Title रामार्चन चन्द्रिका

Author आनन्दवनः मुकुन्दवन शिष्यः

Extent ८९ पत्राणि Age सं. १९२९

Subject तन्त्रम्

श्यामार्चनचन्द्रिका

४७५०

सं. १९२९ आश्विन व्र: ३१
रामार्चनचंद्रकापत्रे ६९ श्लोका २३००
बीरुलखरिसदृष्ये

प्रतिबला ११

अंका: ४७४०

चं॰
१

ॐस्वस्तिश्रीगणेशायनमः श्रीगुरवेनमः श्रीरामचंद्रायनमः तंतुंसंहृत्तिवारिधिंत्रिजगतांनेतारमयस्यप्रभोर्येनैवेदंसक
लंविभातिसततंजातंस्थितंसंहृतं यस्मिन्नेतिनिगमाभवंतिनमनोमानस्यधारास्मतेतंवंदेसहजप्रकाशममलंश्रीराम
चंद्रंपरं १ विश्वव्यापितनोःशुभास्तुपतेर्मूर्तेर्वमूर्तिस्तयोर्वाक्यार्थश्रुतिवाथनेकचतुरशांत्यादिशीलःकविः
सूक्तानांप्यतिवारणैकतरणिर्विज्ञानचिंतामणिर्नित्यानंदपदैकधुर्विजयतेश्रीमन्मुकुंदोयतिः २ वेदांतवा
क्यार्थतरिर्विराजतेयस्मिन्जनःकामयदाद्योनीह तथाप्यदानंदपदंप्रपेदिरेवंदेमुकुंदाख्यवतंगुरुंपरं ३ ए
वंचोजरतापनीयमीथिलंकल्पवरंमारुतेर्ब्रह्मागस्तिवशिष्टवामपज्ञःकल्पास्तथासंहिताः शास्त्राण्येवमयम
हाकवलयेनालोड्यसीतादिकंश्रीरामार्चनचंद्रिकाकलिमलप्रध्वंसिकाप्रोच्यते ४ तत्रदुर्युगतेनानावाक्यैर
वनकल्पितैः सौकर्यार्थक्रमःसम्यक्संक्षेपेणप्रतन्यते ५ उच्यतेप्रथमंतत्रलक्षणंगुरुशिष्ययोः शांतोदांतःकुली
नश्चविनीतःशुद्धवेषवान् ६ सदाचारःसुप्रतिष्ठःशुचिर्दक्षःसुबुद्धिमान् आश्रमीध्याननिष्ठश्चमंत्रतंत्रविचक्षणः
निग्रहानुग्रहेशक्तोगुरुरित्यभिधीयते ७ इतिगुरुलक्षणं शांतोविनीतःशुद्धात्माश्रद्धावान्धारणाक्षमः समर्थ
श्चकुलीनश्चप्राज्ञःसच्चरितोयतिः ८ एवमादिगुणैर्युक्तःशिष्योभवतिनान्यथा गुरुताशिष्यतावापितयोर्वत्स
रवासतः तथाचोक्तंसारसंग्रहे सद्गुरुःसाश्रितंशिष्यंवर्षमेकंपरीक्षयेत् इतितत्रैवराजन्यमान्यजोदोषःपत्नीपापानि

रामः
१

भर्त्तरि तथा शिष्यार्जितं पापं गुरुं प्राप्नोति निश्चितमिति देव्यागमे शिववाक्यं गुरुरप्यासनं यानं पादुकोपानत्पी
ठकं पादोदकं तथा छायां लंघयेन्न कदाचनेति तथा तत्रैव गुरोरग्रे पृथक्पूजामौद्धत्यं च परित्यजेत् दीक्षां व्या
ख्यां प्रभुत्वादि गुरोरग्रे विवर्जयेत् इति शिष्यलक्षणं दीक्षां विनोपदेशस्य दुष्टत्वात्प्रथमं तत्सा पापत्वं यदि व्य
भावे साधकस्य करोत्यतः तत्रापि सिद्धसाध्यादिभेदैः संशोध्य प्रयुक्तं ईदृग्गिरुद्धवनवेतत्प्रोभवादित्तरतल्लहषो
उशवतदेशभौतिकेषु पातालपवदशवह्निहिमांशुकोष्ठवर्णाल्लिखेल्लिपिभवान्क्रमशः स्वधीमान्जन्मा
र्णादक्षरतो वीक्ष्य तत्र मन्त्राद्यमात्रं वर्णाभिकोष्ठकस्त्वक इति कोष्ठचतुष्टये पुनः कोष्ठककोष्ठेषु सर्वतो जं
न्मभावताम् सिद्धसाध्यसुसिद्धारिक्रमात्तेयं विवर्णोः सिद्धः सिध्यति कालेन
साध्यस्तु जपहोमतः सुसिद्धो ग्रहमात्रेण अरिर्मूलनिकृन्तनः सिद्धाणीबांधवाः
प्रोक्ताः साध्यास्ते सेवकाः स्मृताः सुसिद्धाः पोषकास्ते याशत्रवो घातकाः स्मृताः
जपेन बंधुः सिद्धः स्यात्सेवको धिक सेवया पुष्णाति पोषको भीष्टं घातको नाशयेत्
ध्रुवं सिद्धसिद्धो यथोक्तेन तद्द्विगुणात् सिद्धसाध्यकः सिद्धसुसिद्धोर्धजपात् सिद्धारि
र्हन्ति बांधवान् साध्यसिद्धो द्विगुणकः साध्यसाध्यो निरर्थकः तत्सिद्धस्त्रिगु।

अ क घ ह	उ ऊ प	आ ख ट न	ऋ च फ
औ ड व	ऌ फ म	ओ ड श	ल त्र य
ई य न	ट ज भ	इ पा च	ऋ छ व
अ त्र श	ऐ ठ ल	उ ग ख	ए ढ न

वं.

एतान्साध्यारिहंतिगोत्रजात् सुसिद्धसिद्धंजपात्साध्योद्धिगुणाधिकात् तत्सुसिद्धोग्रहादेवसुसिद्धारिःस्वगोत्रहा ३
श्रीरिसिद्धःसुतान्हन्यादरिसाध्यस्तुकन्यकाः तत्सुसिद्धस्तुपत्नीयस्तदरिर्हंतिसाधकं मातापितृकृतंतामंत्राप्यभि ५
२ जनेस्तथा विशेषतस्यवैवर्णान्स्वरवर्णविभेदतः तथैवमंत्रवीजानिततःशोधनमारभेत् विंदुर्द्विविंदुकोपध्मा
नीयजिह्वामूलसंभवः संहतोच्चारणाख्यान्नमधिकाद्दरमेवच अथथंशान्तरंलदौत्यत्काखंउचतुष्टयं मस्त्लल्
पंतेखगःमंत्रान्तरैःसहैकैकं नामवर्णंविशोधयेत् वंजनैर्व्यंजनान्येवस्वरैःस्वाईस्वरास्तथा मा मा तंसंशो घ = घ =
ध्यद्वितीयेनद्वितीयकं मंत्रेवाप्यथवानाम्निवर्णास्युर्विषमायदा तदामंत्रेसमासंपसममंयावत्प्रयोजयेत्
आद्यंतयोःसिद्धवर्णौमंत्रेयस्मिन्स्थितावते अचिरेणैवकालेनसंभवेत्सर्वसिद्धिदः साध्यातादिगतोयस्तुअति
कृच्छ्रेणसिध्यति आदावंतेसुसिद्धस्तुसर्वकामविभूतिदः आदावंतेरिपुर्यस्यभवेत्याज्यःसमंत्रकःस्यात्तत्रय
गतारियोमंत्रोमत्स्नममोमतः शत्रुर्भवतियदादौमध्येसिद्धस्तदंतिकेसाध्यःकष्टेनकार्यसिद्धिस्तस्यफलंस्व
ल्पमेवभवेत् अंतेयदिभवतिरिपुःप्रथमेमध्येवभवतिसाध्ययुगं कार्यविलंवितंस्यात्प्राणस्यति सर्वमेवात्तिके
सिद्धंसुसिद्धमथवारिपूणांतरितपरीत्तयेद्यत्नात् वक्तायसंशजलितंमंत्रंवर्जयेन्मतिमान् नृसिंहार्कवराहाणांप्रासाद
प्रणवस्यच सपिंडाक्षरमंत्राणांसिद्धादीन्नैवशोधयेत् स्वप्नेलब्धेस्त्रियादत्तेमालामंत्रेत्रिवीजके वैदिकेषुचसर्वेषुसि २

डारिनैवशोधयेत् इतिसिद्धसाध्यादिशुद्धः सकलात्मकुलेभेदं वत्यामोमंत्रिणामथ उऊऋॠगजडद्वलक्षषा।
र्थिवाः नङटक्षौघचकस्थभवशाबाहणाः इंपखिठढथफरदाः आग्नेयाः अआपकचटतपाःयस्वामारुताः
ऌॡस्रंह नणनमसहानाभसाः साधकस्यादरेर्णवमंत्रस्यापितदत्तरं यद्येकभूतदेवत्यंजानीयात्स्वकुलेहितं
भौमस्यवारुणंमित्रमाग्नेयस्यापिमारुतं मारुतंपार्थिवाप्यानांशत्रुमेयस्यवालसं नाभसंसर्वमित्रस्यादि
रुद्धनैवमेलयेत् इतिस्वकुलाकुलचक्रं वालादिभेदोप्यपरोमंत्राणामभिधीयते आरभ्यैकादरंमंत्रंवालाआविंश
शादरात् ततआविंशतेर्यावत्प्रौढास्ततोन्यस्थविरामताः स्वाहांताःस्त्रीस्वरूपाःस्युर्नमोंताश्चनपुंसकाः हुंफडंता
स्तुयेमंत्राः पुमांसस्तेप्रकीर्तिताः वालास्तेविविधामंत्रावशशांत्यभिचारके इतिवालादिभेदाः राशिमेलन
माख्यास्यतत्रस्थितिमध्यतः अआइईमेषः उऊऋॠवृषः ऌॡमिथुनः एऐकर्कटः ओऔसिंहः अंअः शषस
हलक्षाकन्याः कवर्गस्तुलः चवर्गोवृश्चिकः टवर्गोधनुः तवर्गोमकरः पवर्गःकुंभः याद्येमीनः साध्या
ख्यातरराश्यंतंगणनास्याथकादरात् एकपंचनववांधवास्तनाडोवषड्दशमास्तुसेवकाः वह्निरुद्रमनपस्तुपो
षकाद्वादशाष्टचतरस्तुघातकाः इतिराशिमेलनं अआश्विनीदेवगणाः इभरणीमनुष्यगणाः ईउऊकृति
काराक्षसगणाः ऋॠऌॡरोहिणीमनुष्यगणाः एमृगशीर्षोदेवगणाः ऐआर्द्रामनुष्यगणाः ओऔपुनर्वसुरेव

चं· गणाः कः पुष्योदेवगणः स्वगाश्लेषाराक्षसः गंच्छ मघाराक्षसः चपूर्वामनुष्यः छजउत्तरामनुष्यगणः फजहस्तोदेवः टचित्रारा
क्षसः उस्वातीदेवः ख्णाविशाखाराक्षसः नथदअनुराधादेवः धजेष्ठाराक्षसः नपफमूलेराक्षसः वपूर्वाषाढामनुष्यः भ
२ उत्तराषाढामनुष्यः मश्रवणोदेवः यरधनिष्ठाराक्षसः लशतभिषराक्षसः वशपूर्वाभाद्रपदामर्त्यः षसहउत्तराभाद्र
पदामनुष्यः क्षअः रेवतीदेवः श्रादित्यैपतगणयेसाधकाख्योदाराक्षथीः जन्मसंपद्विपत्क्षेमप्रत्य[illegible]साधकोव
धः मैत्रं परममैत्रं च जन्मादीनि पुनः पुनः विपद्वधः प्रत्यहरः परित्याज्या मनीषिभिः इति नक्षत्रप्रकारः स्वप्नप्रबोधकालो
यं मंत्राणामभिधीयते अग्नीषोमात्मकामंत्रा विज्ञेयाः क्रूरसौम्ययोः कर्मणोर्वह्निनान्त्यवियत्प्रायाः समीरिताः आ
घ= ग्नेयामनवः सौम्याभूयिष्ठे[illegible]सृतान्तराः आग्नेयाः संप्रबुध्यन्ते प्राणे चरति दक्षिणे प्राणेन्यस्मिन्स्थिते प्राणे सौम्या बोधं प्र
यान्ति च नाडीद्वयं गते प्राणे सर्वे बोधं प्रयान्ति च प्रयच्छन्ति फलं सर्वे प्रबुद्धा मंत्रिणां सदा यद्वा प्राणमान समायोगा
च्छिवशक्तोस्तु मेलने प्रबोधकालो विज्ञेयः स्वापकालस्ततः परः इति स्वप्नप्रबोधकालः संपुटीकृत्य मंत्रेण शान्ता
नाद्यान्तविंदुकान् पुनश्च सविसर्गान्तान्वकारं केवलं पठेत् एवं यन्नायदिदृष्टश्चेत्संप्रबुद्धः शीघ्रसिद्धिदः अथर्वणी यत
पुष्टिश्च कर्मणे सिद्धिदायिनी इन्द्रदैवतर्क्षविपंचदशाङ्गवेदवह्न्यायुधाष्टनवभिर्गणिताश्च साध्यान् दिग्भूमिरिष्ट
तिगजाग्निमनीषवेदे दृष्टिभिश्च गुणितान्तथ साधकार्णान् नामाक्षरादकटवाहतवह्निशेषं तेनोत्तमाधमयोर २

प:क=

यिशेषवशरणंयुतंस्यात् अस्यार्थः इंद्राद्यैःकैः साध्यार्णान्स्वरव्यंजनरूपेण पृथक्कृतान्यशीणितान्कृत्वा तथासाधकनामात्
राण्यपिवेदगादिभिरंकैर्गणयेत् नामाक्षलादिति स्वरव्यंजनसमुदायात् अकठवादिनिवर्गचतुष्टयभिन्ना
न् अकारादिः अः अंतोऽअइउऋऌएऐओऔअंअः एतद्रूपश्चवर्गः कादिटांतः कवर्गः वादिहांतोववर्गः एतेष
केदृशोका दशाद्यराश्रितारोवर्गाः अस्मात् अकठवादष्टभिर्भागेहृते सति उभयोः साध्यसाधकवर्गयोः शेष
स्याधिकरूपस्मरणादेयमितिशेषः यत्रवर्णानामंत्रेदद्यात् मंत्रश्चैद्धरणीभवतितदामंत्रशुभदायकः यत्नीचे
त्रमंत्रेऽयद्यधिकांकः स्यात्तन्मंत्रंतज्जपेत्सुधीः समेऽपिचजपेन्मंत्रंतज्जपेत्तुधनाधिके मृत्येमृत्युंविजानीयात् स्मा
शून्यंविवर्जयेत् राशीनांशुद्धताज्ञेयायथैकेकक्रमतीतिव्ययं स्वराशेर्मंत्रराशिपर्यंतंगणनीयंविचक्षणैः लग्नोधनंभ्रा
तृबंधुपुत्रशत्रुकलत्रकाः मरणंधर्मकामार्थव्ययाद्वादशराशयः इतिराशिशुद्धिः इतिऋणधनशोधनप्रकारः
समाप्तः अन्येपिमंत्रदोषायेतेयान्त्यन्तरादुष्टेः लिख्यंतेमंत्रसंस्कारा दश
दातिलकादशः जननंजीवनंपश्चात्ताडनंबोधनंतथा अथाभिषेकोविम
लीकरणमाप्यायनंपुनः तर्पणंदीपनंगुप्तिर्दशैतामंत्रसंस्क्रियाः मंत्राणांमा
तृकामध्यादुद्धारोजननंस्मृतं प्रणवांतरितान्कृत्वामंत्रवर्णान्जपेत्सुधीः एत

१४	२२	२	१२	१५	६	४	३	८	८	९
अ	इ	उ	ऋ	ऌ	ए	ऐ	ओ	औ	अं	अः
क	ख	ग	घ	ङ	च	छ	ज	झ	ञ	ट
ठ	ड	ढ	ण	त	थ	द	ध	न	प	फ
ब	भ	म	य	र	ल	व	श	ष	स	ह
९	१	७	४	८	३	७	५	४	६	३

चं. ज्जीवतमित्याहुर्मंत्रतंत्रविशारदाः मंत्रवर्णान्समालिख्य ताड्येच्चंदनांभसा प्रत्येकं वायुना मंत्री ताडनं तदुदाहृतं ३ वि
लिख्य मंत्रं तन्मंत्री प्रसूनैः करवीरजैः तन्मंत्राक्षरसंख्यातैर्हन्याद्बीजेन तेन बोधनं ४ स्वतंत्रोक्तविधानेन मंत्रं मंत्राणि संख्यया
५ अश्वत्थपल्लवैर्मंत्रमभिषिंचेद्विशुद्धये ५ संचिंत्य मनसा मंत्रं ज्योतिर्मंत्रेण निर्दहेत् तारं व्योमाग्निमनुयुग्दंडी ज्योतिर्मंत्र
मतः कुशोदकेन जप्तेन प्रत्यर्णं प्रोक्षणं मतो। मंत्रेण मलत्रयं मंत्री विमलीकरणं विदं ६ तारं व्योमाग्निमनुयुग्दंडी ज्यो।
तिर्मंत्रमतः कुशोदकेन जप्तेन प्रत्यर्णं प्रोक्षणं मतः ७ तेन मंत्रेण विधिवदेतदाप्यायनं स्मृतं मंत्रेण वारिणा मंत्रे
तर्पणं तर्पणं स्मृतं ८ तारमायारमायोगो मंत्रो दीपनमुच्यते जप्यमानस्य मंत्रस्य गोपनं त्वप्रकाशनं ९ इति मंत्रसं
स्काराः मंत्रोद्धारमथाख्यास्ये मंत्राणां राघवस्य तु ब्रह्माकल्पादिषु प्रोक्तं साधकानां समीहितं वह्निस्थं शयनं विष्णो
रर्द्धचंद्रविभूषितं एकाक्षरो मनुः प्रोक्तो मंत्रराजः सुरद्रुमः ब्रह्मा मुनिः स्याद्गायत्री छंदो रामस्तु देवता दीर्घाढ्येंदुयुजां
गानि कुर्याद्धृत्वात्मनो मनोः सरयूतीरमंदारवेदिकापंकजासने श्यामं वीरासनासीनं ज्ञानमुद्रोपशोभितं वामोरु
न्यस्ततद्धस्तं सीतालक्ष्मणसेवितं अवेक्षमाणमात्मानमात्मन्यमिततेजसं चिंतयन्परमात्मानं भानुलक्षं जपेन्म
नुं वह्निर्नारायणो नाड्योजाद्यर्थः केवलोपि वा द्व्यक्षरो मंत्रराजोयं भुक्तिमुक्तिफलप्रदः एकाक्षरोक्तध्यानादिस्या
द्यन्नष्टकं तारमायारमानंगवाक्वबीजैस्तु षड्विधः त्र्यक्षरो मंत्रराजः स्यात्सर्वाभीष्टफलप्रदः द्व्यक्षरं चंद्रभद्रां ५

नोह्विवियश्चतुरक्षरः ऋष्यादिपूर्ववद्ज्ञेयमेतेषांतु विचक्षणैः सप्ततिंशोर्द्धमोवाथ हृत्पंचार्णोमनुःस्मृतः विश्वामित्रोमु
निःप्रोक्तःपंक्तिःछंदोस्यदेवता रामभद्रोवीजशक्तिप्रथमार्णनतीक्रमात भ्रूमध्यहृदिनाभ्यंघ्रौपादयोर्विन्य
सेन्मनु षडंगंपूर्ववद्यद्वापंचार्णैमनुनात्मकं मध्येवतेकल्पतरोर्मूलेपुष्पलतासने लक्ष्मणेनप्रगुणेनमत्स्याः
क्षेणेनसायकंश्रवेत्यमाणंजानक्याहृतवंजनमीश्वरं जटाभारलसच्छीर्षंश्यामंमुनीगणावृतं लक्ष्मणे
ष्म नधृतछत्रमथवाप्युकोपरिदशाममथनंप्रागवत्ससुग्रीवविभीषणं विजयार्थीविशेषेणवर्णलक्षंजपेन्मनुं स
कामशक्तिवाक्लक्ष्मीताराद्यपंचवर्णकः षडक्षरः षड्विधः स्याच्चतुर्वर्गफलप्रदः पंचाशन्मातृकामंत्रवर्णप्र
त्येकपूर्वकः लक्ष्मीवाग्मन्मथादिश्चताराद्िःस्यादनेकधाः श्रीमायामन्मथैकैकबीजाद्यंतगतोमनुः चतुर्वर्ण
स्यएवस्यात्षड्वर्णोवांछितप्रदः स्वाहांतोहुंफडंतोवानत्यंतोवाभवेदयं ब्रह्मासंमोहनःशक्तिर्दक्षिणामूर्तिदेवक
ऋगाक्षिश्रीशिवःप्रोक्तामुनयोनुक्रमादिमे छंदोगायत्र्यसंतेच श्रीरामश्चैवदेवता अथवाकामबीजादेर्विश्वामित्रो
मुनिर्मनोः छंदोदेव्यादिगायत्रीरामभद्रोस्यदेवतावीजशक्तियथापूर्वंषड्वर्णान्विन्यसेततः ब्रह्मरंध्रेभ्रुवोर्मध्येहृन्ना
भ्यंघ्रुपादयोः वीजैःषड्दीर्घयुक्तैर्वामंत्राणैर्वाषडंगकं ध्यायेकल्पतरोर्मूलेसुवर्णमयमंडपे पुष्पकाख्यावि
मानांतःसिंहासनपरिच्छदे पद्मेचतुर्दलेदेवमिंद्रनीलमणिप्रभं वीरासनसमासीनंव्याख्यामुद्रोपशोभितं वा

वं. मोरुत्पलतद्भुजं सीतालक्ष्मणसेवितं सर्वाभरणसंपन्नमतुलं तं जपेन्मंत्रं षडक्षरादिमंत्राणां जपाभवाहरिंस्मरेत
रामश्चंद्रभद्रांतोडेन्तोनतिद्विधा नारादिसहितः सोपिमंत्रस्त्वष्टाक्षरः स्मृतः तारायंतगतः सोपितवार्णः स्याद्नेक
५ धातारामश्चतुर्थ्यंतः क्रोधास्त्रंवह्नितल्पगा षडार्णोयपरोमंत्रः ऋष्यादिःस्यात्षडर्णवत सप्तार्णवीजंवदेन्मायोहृद्रा
मायुप्रतश्चांतो शिवोमा राममंत्रोयं वसुवर्णस्तु वसुप्रदः ऋषिःसदाशिवःप्रोक्तोगायत्रंछंदउच्यते शिवोमारा
मचंद्रोत्रदेवतापरिकीर्तिता दीर्घयामाययांगानि ताराद्यंवार्णयुक्तया रामंत्रिनेत्रंसोमार्द्धधारिणंशूलिनं
वरं भस्मोद्धूलितसर्वांगंकपर्दिनमुपास्महे रामाभिरामांसौंदर्यसीमांसोमावतंसिनीं पाशांकुशधनुर्बाणा।
धरांसीतांत्रिलोचनांध्यायेन्नेवंवर्णलक्षंजपेत्रिमधुराक्तैः बिल्वपत्रैःफलैःपुष्पैस्तिलैर्वापंकजैर्हुनेत् स
यमायांतिनिश्चयमस्यस्तेरामिताः जानकीवल्लभंडेंतंवह्निजायाक्रमादिकं दशाक्षरोयंमंत्रःस्याद्वशिष्ठःस्या
दृषिःस्वराट् छंदस्तद्देवतारामःसीतापाणिपरिग्रहः आद्योबीजंद्विठःशक्तिःकामेनांगक्रियामताशिरो
ललाटभ्रूमध्येतालुकंठेषुहृदयेपि नाभ्यूरुजानुपादेषुदशार्णान्विन्यसेन्मनोः अयोध्यानगरेरत्नचित्रेसौव
र्णमंडपेमंदारपुष्पैराबद्धवितानेतोरणांचिते सिंहासनसमारूढंपुष्पकोपरिराघवं रक्षोभिर्हरिभिर्देवैर्दि
व्ययानगतैःशुभैः संस्तूयमानंमुनिभिःप्रह्वैश्चपरिसेवितं सीतालंकृतवामांगंलक्ष्मणेनोपशोभितंश्यामं ५

७=

प्रसन्नवदनं सर्वाभरणभूषितं ध्यायेन्नेवं जपेन्मंत्रं वर्णलक्षं विचक्षणः रामङे·तं थवन्नुघ्यागियेङे·तं स्पाहाद्विसुंदरी
दशाक्षरोयंमंत्रः स्यान्मुनिर्ब्रह्माविराट् स्मृतं छंदस्तु देवता प्रोक्ता रामो राक्षसमर्दनः आद्यो बीजं द्विठः शक्तिस्तेने
वांगानि पूर्ववत् वर्णन्यासं तथा ध्यानं तथा पोरश्चरणिकं विधिं दशाक्षरोक्तवत्कुर्याच्चापवाणधरं स्मरेत् ओं हृङ्गग
वते रामचंद्रभद्राच डेस्य तो अर्कार्णो ह्रिविधोप्यस्मन्त्र ऋषिध्यानादि पूर्ववत् श्रीं पूर्वं जयमध्यस्थं तद्द्वियां राम नामव
त्रयोदशार्णो ऋष्यादि पूर्ववत् सर्वकामदः पदत्रयै द्विराहृत्तैरंगं ध्यानं दशार्णवत् सतारं हृङ्गवते रामङे·नमहात्मनः
पुरुषाय पदं पश्चान्नदंतोष्टादशाक्षरः विश्वामित्रोमुनिः छंदो गायत्रं देवता मनोः दशास्यदर्पदलनो रामभद्रः समी।
रितः तारं बीजं नतिः शक्तिः षडंगं कल्पयेत्ततः मूलमंत्रं कोशलेंद्र मध्यसंस्थमनंतरं रावणांतकवामानं सर्वलो
कहितेतथा स्वाङ्कप्रसन्नवदनं ध्यात्वा ध्यानं समाचरेत् नंदिग्रामस्थापवने भरतायतकौतुके रम्ये सुगंधिपुष्पाढ्ये
ईदसवैडेस्वमंडिते तिःशाणभेरीपटहशंखतूर्यादिनिःस्वनैः प्रहृतनृत्यपरितो जयमंगलभाषिते पटीरहुसृणै
र्षीरकर्पूरागरुगंधिते नानाकुसुमसौरभ्यवाहिगंधवहांचिते देवगंधर्वनारीभिर्गायत्रीभिरलंकृते सिंहा
सनसमारूढं पुष्पकोपरि राघवं सौमित्रसीतासहितं जयशब्दकटशोभितं चापवाणधरं श्यामं ससुग्रीवविभीष
णं हत्वा रावणमायान्तं कृतत्रैलोक्यरक्षणं रामभद्रं हृदि ध्यायन्दशलक्षं जपेन्मनुं रामभद्रमहेष्वर्व साग्निचयततः

चं. परं वीरं नरोत्तमपदं दशास्यांतकमीतत नतोरत्नवतोदेहिपश्चादापयेमप्रियं द्वात्रिंशदक्षरोमंत्रो विश्वामित्रोमुनिर्मतोः
६ छंदोनुष्टुपदेवताचराममद्रप्रकीर्तिताः चतुष्करणावेदांघ्रिवर्णैस्तेरंगकल्पना मूर्द्धिभालेदृशोश्रोत्रेगंडयुग्मेसनासि
के श्वास्यदोसंधियुगलेस्तनहृन्नाभिमंडले कट्यांमेढेपायुपादसंधिष्वर्णान्न्यसेन्मनोः पूर्वोक्तध्यानमंत्रोपि
6 त्रिलक्षंनिषर्नजपेत् पीतंवाचिंतयेद्रामंधनातीवामतजपेत् सतावहृद्गवतेवतुर्थ्यारघुनंदनं रक्षोघ्नविशदं
तद्वन्मधुरेतिवदेत्ततः प्रसन्नवदनेकेतुवेदद्मिततेजसे बलरामोचतुर्थ्यंतोविरत्नुडेः नंततस्ततः श्रोक्तोमालाम
नुःसप्तचत्वारिंशद्भिर्वर्णैः ऋषिःपितामहःछंदोमवेदनुष्टुपदेवताः रा[illegible]भिषिक्तोरामश्चवीजशक्तियथाराषि
रस्यानननहृत्तेवभ्रूमध्येलिङ्गयोरपिषश्रोत्रयोर्घ्राणयोश्चैवगंडयोरोष्ठयोरपि दंतयोरास्यदेशेचदोःपत्सुपृष्ठके
भुव कंठेहृदिस्तनद्वंद्वेपार्श्वयोःपृष्ठदेशतः जठरेनाभ्यधिष्ठानेगुह्येवर्णान्यविन्यसेत् सप्तर्द्धसप्तदशषड्दस
दे= दैःषडंगकं ध्यानंदशा[illegible]रपोक्तंलक्षमेकंजपेन्मनुं विल्वैःफलैःप्रसूनैश्चपत्रैर्विमधुमंयुतैः मधुत्रितयुक्तो
नपायसेनाथवांवुजैः होमंदशांशतःकुर्यात्तथासर्वत्रतर्पणं सर्वेषुराममंत्रेषुमंत्रराजःषडक्षरः एकधाचद्विधा
यात्रेधाचतुर्थापंचधातथा षट्सप्तधाष्टधाचैवबहुधायंव्यवस्थितः राममंत्रस्यभेदस्तुशिवोज्ञातानितत्त्वतः
रामासीताचतुर्थ्यंतास्वाहांतोयंषडक्षरः सीतामंत्रश्चकथितःस्वतंत्रोंगपरोपिच जनकोस्यऋषिःछंदोगाय ६

त्रंदेवतामनोः सीताभगवतीप्रोक्ता श्रीबीजंशक्तिरंततो दीर्घस्वरयुतातेनषडंगानिप्रकल्पयेत् एवंजपेद्देशेस्मिंवेपीठेध्यायेद्रा
घवंसंयुतां स्वर्णाभंभुजकरैरामालोकनतत्परां वर्णलक्षंजपेन्मंत्रंमिष्टार्थंसाधयेत्ततः मंत्रराजमथाग्नेयंलक्ष्मण
स्यप्रतन्यते रेफपूर्वंसमुद्धृत्यसेंदुलक्ष्मणसंयुतं ङेंतोयंलक्ष्मणमंत्रोनमसावसमन्वितः अगस्तिःऋषिरस्यायंगा।
यत्रंछंदउच्यते लक्ष्मणोदेवताप्रोक्तालंबीजंशक्तिरस्यहि नमस्त्वौविनियोगेहि पुरुषार्थचतुष्टये दीर्घभाजास्ववी
जेनषडंगानिप्रकल्पयेत् द्विभुजंस्वर्णरुचिरतनुंपद्मभिमेक्षणं धनुर्बाणकरंरामसेवासंसक्तमानसंएवंजापिवेस्मिंवेपी
ठेसांगायवर्जिते सप्तलक्षंपुरश्चर्याततःसिद्धस्तुसाधयेत् भरतस्यैवमेवस्याच्छत्रुघ्नस्याप्ययंविधिः आद्यःस्वेनोदिताह्ये।
तेप्रथास्येनापिसंमताः आदौवाप्यंततोवापिपूजायांराघवस्यतु एतेषामपिकर्तव्याभुक्तिमुक्तिफलेप्सुभिः प्राया
न्येतत्पृथक्केनतुप्रोक्तास्वेरामपीठके लक्ष्मणस्तुसदापूज्यःप्राधान्येनैवनित्यशः यथारामस्यपूजास्यात्तथातस्यापि।
नित्यशः साफल्यंरामपूजायायदीच्छेन्नियतव्रतः तत्प्रयत्नेनकर्तव्यालक्ष्मणस्यापिविस्तरात् श्रीराममंत्रभेदास्तुवहु
वःसंतिवैमने तस्मात्थकेसदाकार्याःसौमित्रेरपिनित्यशः अष्टोत्तरशतंसहस्रंवाशतंवासुसमाहितः लक्ष्मणस्यमनुं।
जपेत्प्रोमसमुद्बुभिरंतंद्विजैः अजप्त्वालक्ष्मणमंत्रंराममंत्रान्जपंतिये तेनःजयस्यफलंनैवप्रयांतिकुशलाद्यपि श्रीरामित्रविवे
कोपिनैवकार्योभवेद्विद् योजपेल्लक्ष्मणमंत्रंनित्यमेकांतआस्थितः मुच्यते सर्वपापेभ्यःसकामानश्नुतेविलाभ

चं.

७

प्रयोगाद्येवमंत्रोयमुपदिष्टो हि शार्ङ्गिणा अर्जुनस्य पुरा सम्यग्गतेनैव जयं जयः दिशो विजित्य सकलाः सकृद्धृतैकप
वद्धि प्रीतिहिपद्धर्मराजं पैतृके राज्य उत्तमे जनप्रयातो मंत्रोयं राज्यप्राप्त्यैकसाधनं योजपेन्नियतो मंत्रं लक्षमेकं समा
हितः सोचिरान्नष्टराज्यस्वप्राप्नोत्येव नसंशयः अभिषिक्तमयोध्यायां ध्यायेद्रामममध्यधीः पंचपुत्तीमिमं जप्त्वा न
ष्टराज्यमवाप्नुयात् नागपाशविनिर्मुक्तं ध्यायन्नेकांतमाश्रितः अयुतं जपेन्मंत्रः स्मान्निगडये लदेवाद्वि श्री
जनेयसमानीतमहौषधीहृतव्यथं ध्यायंस्त्वयुतं जप्येन मुच्यत्सुज्वरेत्वरः इंद्रजित्प्राणहर्तारं ध्यायन्नेवं समा
श्रितः दुर्जवातिवेगं तं जपेदरिकुलं वहन् शूर्पणखानासाग्रछेदनोद्युक्तमानसं ध्यायन्सहस्रजाप्येन प्रहृष्टतादिका
न्नयेत् रामपादाब्जसेवार्थंकृतद्वारमथस्मरन् जपन्नयुतमेकांते महारोगान्वहून्पित्तयापस्मारकुष्ठादि
न्नाशयेत्येव नन्दनात् त्रिमासं नियताहारो जपमंत्रमदस्सकं दिने दिने विधानेन सुजयन्विजितेंद्रियः अष्टोत्तरशतै
पुष्पैर्मिविद्धैः शतपत्रकैः पायसं सर्करोपेतं नैवेद्यं विधिवन्नुतिः घनसारसमायुक्तचंदनेनावलिप्य च देवो देशेन मंत्र
ह्रस्यनित्यमेव द्विजोत्तमः कुष्ठरोगात्प्रमुच्येत दुश्चिकित्स्यादनेकशः मसोगहजा बहुविधा मंडलाविषभेदतः तेसर्वे
नाशमायांति दुश्चिकित्स्या अपित्वरात् एकांते नियताहारः षण्मासं विजितेंद्रियः जपत्वेवं विधानेन तदपरोगात्प्रमु
च्यते माषाश्यान्नैवेद्यं जप्त्वा मंत्रं समाहितः वातरोगात्प्रमुच्येत बहुतेदादपित्वरात् अभिमंत्र्य जलं नित्यं मंत्रेणानेन समाहितः ७

प

पीत्वासंध्यासुभक्त्यावैमुच्यतेसर्वरोगतः दारिद्र्यंनाशयित्वातुश्रियमाप्नोतिसुव्रतः विषादिरोगसंस्पर्शोनभवेत्तुकदाचनः यदासे
वयतिदिनंसर्वंभक्त्यासमाहितः सत्वेनशौदसंभूतान्नयेद्रोगान्सुदारुणान पित्ताभिमंत्रितजलंक्वदिरोगान्नयेद्द्रु द्र=
न देवस्यप्रतिमादानंकृत्वाभक्त्याविधानतः सर्वेभ्योपापरोगेभ्योमुच्यतेनात्रसंशयः कन्यार्थीचोमिलापा...ग्रहणं रि=
शालमातसं ध्यायेल्लक्षमंत्रंजप्त्वाहुत्वगव्याज्यैर्दशांशकं इप्सितंप्राप्नुयात्कन्यांशीघ्रमेवतपोधन दीक्षितंजसुगणसा।
णामंत्रेषुनियतःव्रतः संस्मरन्विधिवन्नित्यमासनंयममन्मथीः पूजापरः सर्वसम्पत्सहस्रंविजितेंद्रियः जपन्नित्यविल
विधानेनतेजोभवतिध्रुवं विश्वामित्रकृतंवैरंकृत्वाद्भुतपराक्रमं ध्यायन्नयुतजाप्येनभयेभ्योमुच्यतेचिरात संध्या
चोपास्यविधिवन्मूलमंत्रेणमंत्रवित् त्रिकालंनियतोभूत्वाकृतनित्यविधिःस्वयं दीक्षायुतोयथान्यायाज्जपन्नयुतंपरंःम
रं मुच्यतेसर्वपापेभ्योयातिविष्णोपरंपदं ऐहिकानन्तपदैवतिकामोयेवयेहिभं दीक्षांप्राप्यविधानेननरोविगत।
कल्मषात स्नाचारनिरतादांताब्रह्मस्त्याद्विजितेंद्रियात तदनन्तानुसारेणपरस्थार्यायथाविधि सर्वान्मुण्यपापोयाद
ग्धुनिर्मलमानसः प्रतरावतिरत्नेशायतंपदमाप्नुयात सकामोवाछितंलब्ध्वासकाभोगान्मनोहरान जातिस्मर
चिरंभूत्वायातिविष्णोःपरंपदं यथाश्रीराममंत्राणांप्रयोक्तःपापसंभवं तथोनोलक्षणमनोकिंनुयातियरांगतिं किंचि
तत्वार्थमेवस्युःकेचिदैहिकेसाधना भुक्तिमुक्तिफलंचायमेकेचित्तायतेपरं श्रीजनेयमंत्रंवदेभक्तिमुक्त्येकसा।

यं॰ धनं प्रकाशितंशंकरेणलोकानांहितमिछता:भूतप्रेतपिशाचादिडाकिनीब्रह्मराक्षसा दृष्ट्वैवप्रपलायंतेमंत्रानुष्ठानतत्परं
प्रधानंचांगभूतोयंमंत्रराजोत्यद्भुतमेः पूर्वंनमः पदंचोक्त्वाततोभगवतेपदं अंजनेयपदंङेंतमहावलपदंतथा वह्निजा
८ जायांतएवस्मान्मंत्रोहनूमतःपरं पूर्वसिद्धिकरःप्रोक्तोमंत्रश्चाष्टादशाक्षरः मालाख्योपरमंत्रोपिमारुतेसर्वसिद्धः
प्रणवंपूर्वमुच्चार्यनमोहनूमतः पदंङेंतंप्रकटसंयुक्तंपराक्रमपदंततथा तथाक्रांतपदोपेतंदिङ्मंडलमुदीरयेत् य
शोवितानधवलीकृतजगत्त्रितयेत्यथ वज्रदेहेतिचोक्त्वाततरुद्रावतारपदंततथा संवुध्यंतंपदंलंकापुरीदहनमीर
येत् उदधेर्लंघनंचापिदशग्रीवहतांतकं सीताश्वासनेतिपदंमंजनागर्भसंभवं श्रीरामलक्ष्मणानंदकारिन्कपिसै
न्यप्रकाशकसुग्रीवसाहाय्यकारणपदंपर्वतोत्पाटनंतथा वालब्रह्मचारिन्नितितथागंभीरशब्दपदंततथा सर्वग्रहविना
शनसर्वज्वरछेदनेतिच डाकिनीध्वंसनपदंततस्तारमुदीरयेत् मायाह्रांत्रयमुच्चार्यहनूमोवहिपदेततः सर्वविषहरपर
वलदोभयमेतिच सर्वकार्याणिसाधयेतिद्विरुच्चरेत् हुंफट्स्वाहेतिमंत्रोयंमालाख्यःसर्वकामधुक् ऋषिरीश्वरएव
स्यादनुष्टुप्छंदउच्यते हनूमान्देवताप्रोक्ताहंबीजंशक्तिरत्नजो कीलकंह्रांत्रयंप्रोक्तंवेश्यकंरुहहसोऽप्रतः हनूमच्छीगतं
चैवफलमात्रमुदीरितं नमोभगवतेचांजनेयायांगुष्ठयोर्न्यसेत् रुद्रमूर्त्तयेरत्पवेतर्जनीभ्यामनंतरं वायुसुतायाग्रपितथा
मध्यमाभ्यामपिस्फुटं अग्निगर्भायचतथानामिकाभ्यांप्रविन्यसेत् रामदूतायचप्रतःकनिष्ठाभ्यांविचक्षणः ब्रह्मास्त्र ८

निवारणाय चास्य मंत्रस्य समीरितः पूर्ववत्षडंगं च कृत्वा ध्यायेदनन्यधीः स्फटिकाभं स्वर्णकांतिं द्विभुजं च कृतांजलिं कुंडल
द्वयसंशोभिमुखांभोजं महद्धर्षदः अयुतं तु पुरश्चर्या रामस्यापि शिवस्य च पूजां तु वै लवेपीठे शैवे वा विदधीत वै आहुति
भिर्विना नित्यं तत्काशी विजितेंद्रियः तद्रोगनिवृत्यर्थं महोत्तरशतं सुते जप्त्वा त्रिदिनमेकांते तेभ्यो मुच्येत तत्क्षणात्
तद्दस्मृत ग्रहशांत्यर्थं शतमहोत्तरं पुनः दिनत्रयमथो जप्त्वा भूतात्तो मुच्येत भयात् भूतप्रेतपिशाचादिशांतये होत्तरं
शतं जप्त्वैव तद्भयान्मुक्तो भवेदेव न संशयः महारोगादिशांत्यर्थं महोत्तरसहस्रकं जप्त्वा तस्मात्प्रमुच्येत निश्चितं
नियताशनः जयाभिकांक्षिणां राज्ञामस्मादन्यन्न विद्यते ध्यायेद्रात्रौ सहस्रं तारमयुतं नियताशनः जपन्नियतमांश्चैव
जयेद्दुर्जयमप्यरिं संधानाय तु सुग्रीवसंधातारं स्मरन्नपि अयुतेनैव बलिना संधिमाप्नोत्यसंशयः लंकायादाह
कं ध्यायन् जपन्नयुतं मंत्रमा शत्रुराष्ट्रं दहेद्देव दुर्ग्राह्याब्धिमपि चानघ जयार्थी विप्रसंधानामस्मादन्यान्न विद्यते यस्तु
गेहे हनूमंतं सर्वदेव प्रपूजयेत् नवेदं तस्य मंत्रेण तस्य लक्ष्मीर्न चंचला दीर्घमायुर्लभेद्देव सर्वत्रैव विजयी भवेत्
मायादिभूतसंदोहभद्रदेशे नैव जायते शत्रवः सर्वदा मित्रभावेनैवासते सदा शैवानां वैष्णवानां च षट्कर्मा त्रप्रद
र्शितं नान्यत्साधनमस्त्येव मंत्रादस्माद्धनूमतः चोरव्याघ्रादिभीतानामयमेव परायणं परराजराज्यानां यथावि
ज्ञातं परैः पुनः सत्वाहमाज्ञायुद्धे पुरुहानोपरमेनिकैः यात्राकाले हनूमंतं स्मरन् यस्तु गृहान्निर्गच्छति

चं.
९

मेवेमेनद्दृष्टार्थमभिगच्छति स्वापकालेस्मरन्नित्यंचोरभूतादिकान्जयेत् यद्वयवामदेवाख्येहनूमत्पदंततः फलंति
फलितपदंयथोक्तियथेतिच शुध्याधहृद्द्वादेतिसद्यः प्रत्ययकारकः चतुर्विंशात्यकरकोमंत्रोयंश्रीहरेणगदितः वागस्त्रि
दलंचैलमष्टपत्रगणितंशुभे वशंजमकलंस्थाप्यकमास्तीहोदरोपरि सप्तधारणापलाशेवै वटपर्णेहिपूर्नापयेत् मं
त्रेणानेनाभिमंत्र्यसप्तवारंतथापुनः तत्राभिमंत्रयेद्देवंसप्तभिस्तोविचक्षणः स्फोटकादाराड्वेत्तीहालक्ष्मीभूतानसंशयः
कर्पूरागुरुहृद्गंधेनपूजाकारेपटेलिखेत् कोकिलादस्यलेखन्याहृपद्वहनूमतामन्त्र उद्धृत्याष्टदशार्णोमंत्रमध्येभिधा
मरेः मूर्ध्निवह्निनतोतेवत्रैलोक्यंजयतिध्रुवं यद्धोमतांजयेच्छायांमंत्रयासमालिखेत् चंद्रसूर्यग्रहेजप्त्वामातृका
मोक्षणावधि होमयेद्दशांशेनतिलसर्षपकादिभिः युद्धकालेपताकांतांगजेवाश्वोपरिसंस्थितं दर्शयन्परसैन्य
स्यभंगोभवतिनिश्चितं मालामंत्रंजपेद्यस्तद्धनूमंतंस्मरन्रणे वज्रांगोजायतेयुद्धेहनूमत्समविक्रमः अथरक्षाप्रव
क्ष्यामिसर्वसिद्धिप्रदायकां स्तंभनीसर्वसैन्यानांभूतानांचवशंकरी रोचनाकुंकुमाभ्यांचभूर्जपत्रेसुशोभने सुव
र्णमयलेखन्यायंत्रमष्टदलंलिखेत् माध्यनामचतन्मध्येमूलमंत्रंदलाष्टके मालामंत्रंचतद्बाह्ये त्रिधाक्रौंका
रवेष्टितं वेष्टयंत्रंत्रिलोहेनकटिवाहुशिरस्थितं धारयेद्यस्तुमंत्रज्ञोविघ्नस्तस्यनजायते शोकातंकलं तव्यवहारे
पराभव शांतिनाक्रमेतेतस्यवज्रदेहोपिकलः उपसर्गादिदोषांश्चविषंस्थावरजंगमं नभयंविद्यतेतस्य स्त्रीणांचा ९

मन्त्र=
घू

तीववल्लभः तस्यपीडनकुर्वंतिग्रहाश्चैवउपग्रहाः जलवह्निभयंनास्तिव्याघ्रतस्करजंतथा ज्वराःसर्वेविनश्यंतिश्चादिका
यामहाबलाः येतयादिमहारोगाश्चयेत्रप्रजसुप्रभावनः तारंहकारोरग्निशवः षष्ठीयस्वरंविदुमान प्रणवांतेोद्धारकोमूल
मंत्रउदाहृतः नारायवस्त्रकायेतिवतवइतिचोद्धरेत कपिलपिंगलप्रोक्तोऊर्द्ध्वकेशमहाबलः रक्तमुखतडिज्जिह्वाम
हारौद्रपदंततः दंष्ट्रोत्कटकस्हकस्हकरालिनेवदेत्ततः महादृढप्रहारिश्चलंकेश्वरवधायतु महासेतुवधपदंमहाशै
लप्रवाहवगगनचरएह्येहिभगवन्महापदंबलपराक्रमपदंभैरवाज्ञापयेतिचएह्येहितिमहारौद्रदीर्घपुच्छेनवे
ष्टय वैरिणंभंजयपदंह्रिंहुंफटततकः पंचविंशत्याद्यधिकः प्रोक्तोमंत्रःशतात्तरः मालामंत्रोयंज्वरादीनांरोगाणां
मंत्तकःस्मृत इतिश्रीराममंत्रोद्धारः गणेशादिचतुर्णांनरामंत्रात्वप्रतीयते सर्वेदेवास्तुवंतीतिसामान्यश्रुतिबो
दनात मंत्रराजागतासर्वमंत्राणाश्रुतिचोदिता तेयामादादनुक्तापिपरब्रह्मत्वविग्रहात तस्मान्नेयेगणेशानंसूर्यं
नैऋत्यकोणकेवायव्यंतंविकामीशामीप्रागन्यपूजयेक्रमात शशिविस्तगविशशिगमस्प्रशिविनविस्तगशग
व्यंतरेनक्तःक्रमःपंचसुवह्नितः स्वस्थानवह्निताद्देवादुःखशोकामयप्रदाः मत्वेपुष्पांजलिदत्वागणेशायर्चनं
भवेत गणेशएवसर्वस्त्रेतत्रसूर्यक्रमाद्भवेत तेषांतनेकेमंत्राहस्तेत्तयाग्रंथांतराद्बुधैः संक्षेपेणेहकथ्यंतेग्रंथ
विस्तरभीतितः तारश्रीशक्तिस्मरभूस्ववीजंगणपतिंवदेत ॐ वरवरदंसर्वजनंमेवशमानयस्वाहा

चं.
येऽग्निवल्लभां अष्टाविंशत्यक्षरोऽयं महागणपतेर्मनुः गणकोऽस्य ऋषिः छन्दो गायत्री तु देवता महागणपतिः प्रो
क्तो देवो भुवनवन्दितः षडन्तं बीजमाख्यातं शक्तिः श्रीर्मिद्वयं स्मरः सर्वाभीष्टफलप्राप्त्यै विनियोगोऽत्र कीर्तितः तारा
१० द्यादिस्वबीजेन दीर्घभाजा कल्पना बीजापूरगदेक्षुकार्मुकरुजाचक्राब्जपाशोत्पलव्रीह्यग्रस्वविषाणरत्नक
लशान्हस्तैर्वहन्तं भजे हस्तीन्द्राननमिन्दुचूडमरुणच्छायं त्रिनेत्रं रसादाश्लिष्टं प्रियया सपद्मकरया स्वाङ्कस्थया सं
ततं श्रीपर्णविल्वमभितश्च रमारमेशौ तद्दक्षिणे वटतले गिरिजाहरौ च पृष्ठे च पिप्पलतरो रतिपुष्पबाणौ
10 सव्ये प्रियंगुमभितश्च महीवराहौ सव्यासव्यभागेन स्पर्धयोश्च शंखपद्मनिधी मौक्तिकमाणिक्याभौ वर्षन्तौ
धाराश्चायतनानि सद्य निजपक्षकरस्थरत्नकलशश्रुतमणिमुक्ताप्रवालवर्षेण अविरतधाराविकिरन्तमभितः साधकस
मस्तसंपत्त्यै तारं घृणिः सूर्य पमादित्यमितिवहेत अष्टाक्षरसूर्यस्य मन्त्रोऽयं समुदीरितः भार्गवोऽस्य ऋषिश्छन्दो गा
यत्रं देवतामतः आत्मा मुनिभिः प्रोक्तो दृष्टादृष्टफलप्रदः अंगमन्त्राः प्रदर्श्यन्ते सत्याय हृदयं ततः ब्रह्मणे च शिरः
प्रोक्तं विष्णवे च शिखा मता रुद्राय वर्म निर्दिष्टमग्नये नेत्रमी सूर्यमन्त्रः ओं घृणिः सूर्य आदित्यं ते सर्वाद्यास्त्रं च वि
ज्ञेयमिति स्यादंगकल्पना रक्ताब्जयुग्माभयदानहस्तं केयूरभूषाङ्गदकुण्डलाढ्यं माणिक्यमौलिं दिननाथ
मीडे बन्धूककान्तिं विलसत्त्रिनेत्रं सान्तोऽनन्तयुतो हंसयुक्तो विन्दुविभूषितमस्तकः प्रासादसंज्ञोऽमनुः प्रोक्तो भक्तानां सुरपा १०

दयः ऋषिस्याद्वामदेवोऽस्य पंक्तिश्छन्दः समीरितं सदाशिवो देवतात्र हंवीजं शक्तिरोंस्मृता दीर्घस्वरयुजन्मूलवीजेनस्यात्षडंगकं मुक्तापीत
पयोदमौक्तिकजपावर्णैर्मुखैः पंचभिस्त्र्यक्षैरंचितमीशमिंदुमुकुटं पूर्णेन्दुकोटिप्रभं शूलं टंककृपाणवज्रदहनान्नागेंद्रघंटां
कुशान् पाशाभीतितरं दधानममिताकल्पोज्वलं चिंतयेत् लकुलीशोऽस्य माङ्कोवामनेत्रार्द्धचंद्रयुक् भुवनेशी समाख्या
ता भुक्तिमुक्त्यैकसाधनं ऋषिः शक्तिर्भवेच्छंदो गायत्री देवता मता हंवीजं मीशशक्तिरस्येहार्थे विनियोजयेत् षड्दीर्घयुक्त
वीजेन षडंगानि प्रकल्पयेत् उद्यदादित्यसंकाशां ग्रदंतां स्मेरमुखीं भजे पाशांकुशाभयवरान्दधतीं जगदंबिकां सिद्धादि
योगतानेषामंगलेसति राजवत् मंत्राप्रकारः प्राधान्येद्रष्टव्यो ग्रन्थविस्तरात् इत्यंगदेवतामंत्रोद्धारः ग्रागत्यार्कंचमाहा
त्म्यप्राधान्यकारणमहत् वक्ष्ये श्रीमंत्रराजस्य शृणु तत्त्वं यथातिसत्कृति सर्वेषु मंत्रवर्ग्येषु श्रेष्ठो वैष्णव उच्यते गाणपत्येषु शैवेषु
शाक्तेषु सौरेषु मीप्सितं वैष्णवेष्वपि सर्वेषु राममंत्राः फलाधिकाः गाणपत्यादिमंत्रेषु कोटिकोटिगुणाधिकाः विनैवदी
क्षां विप्रेंद्र पुरश्चर्यां विनैव हि विनैव न्यासविधिना जपमात्रेण सिद्धिदाः मंत्रेष्वेषु पिनायासफलदोऽयं षडक्षरः षडक्षरो
यं मंत्रस्तु सर्वाघौघनिवारणः मंत्रराज इति प्रोक्तः सर्वेषामुत्तमोत्तमः दिने दिने च दुरितं पक्षमासर्तुपदजं सर्वं दहति निः
शेषं तूलराशिमिवानलः ब्रह्महत्यासहस्राणि ज्ञानाज्ञानकृतानि च स्वर्णस्तेयसुरापानगुरुतल्पायुतानि च कोटिको
टिसहस्राणि ह्युपपातकजान्यपि सर्वाण्यपि प्रणश्यंति राममंत्रानुकीर्तनात् इत्यादि तथा च श्रुतिः पंचतारकंब्राह्म

चं. एगनित्यमधीतेसपाप्मानंतरतिसमृत्युंतरतिसब्रह्महत्यांतरतिससर्वहत्यांतरतिससंसारंतरतिलोविमुक्तात्माश्रितोभवति
११ सोऽमृतत्वंचगच्छति अनेनसदृशोमंत्रोजगत्स्वपिनविद्यते अनेनाराधितोरामः प्रसीदत्येवसत्वरं सामान्येनैवसर्वेषां
मंत्राणांराघवस्यतु अनुष्ठानविधिर्ज्ञेयोविशेषांतरतत्वे इतिमंत्रमाहात्म्यंरामस्य श्रीराममंत्रराजस्यमभ्यगर्थोभि
धीयते संहितोपनिषन्मूलः सर्वकार्यार्थसिद्धिदः रकारोवह्निवचनः प्रकाशेपर्य्यवस्यति सच्चिदानंदोस्यपरमा
त्मार्थउच्यते व्यंजनंनिष्कलंब्रह्मप्राणोमायेतिचस्वरः व्यंजनैःस्वरसंयोगाद्विहितत्प्राणयोजनं रेफेज्योतिर्मयेतस्मा
त्कृतमाकारयोजनं मकारोभ्युदयार्थत्वात्मायेतिचकीर्त्यते अयमेवात्मतत्त्व्याकारमेकाक्षरोमनुः सोयं
वीजस्यकेतस्यात्समायंब्रह्मउच्यते सविंदुःसोपिपुरुषःशिवसूर्येंदुरूपवान् ज्योतिस्तस्यशिखारूपंतादस्सप्रकृ
तिर्मता प्रकृतिःपुरुषश्चोभौसमायाब्रह्मणःस्वतः विंदुनादात्मकंवीजंवह्निःसोमकलात्मता अग्निषोमात्म
कंविश्वंरामवीजेप्रतिष्ठितं यथैवावटवीजस्थःप्राकृतश्चमहाद्रुमः तथैवरामवीजस्थंजगदेतच्चराचरं इतिश्रुतिः
य२ इतिवीजार्थः अक्षरार्थस्तुनास्येवविशदीकृतेमनोः वीजोक्तमभयात्मत्वंरामनामनिदृश्यते वीजमायाविनिर्मुक्तंप
रंब्रह्मेतिकीर्त्यते मुक्तिदंसाधकानांतुनमकारोमुक्तिदोमतः मारूपत्वात्ततोरामोभुक्तिमुक्तिफलप्रदः [illegible]वा ग्राद्या =
तत्पदार्थःस्यात्मकारस्त्वंपदार्थवान् तयोःसंयोजनंतमसीत्यात्मतत्त्वविदोविदुः नमस्त्वमसीत्यादिवाक्यंतुकेवलंमुक्तिदं ११

यतः मुक्तिभक्तिप्रदं चेदं तस्माद्व्यतिरिच्यते रमंतेयोगिनोनित्यंयज्ञास्मयतिस्वकान् निर्गुणंसच्चिदानंदंसगुणंचोतिकी
र्त्यते जीववाचिनमोनामचात्मारामेतिगीयते तादात्म्यिकायावनर्थीनयावाचयेतिकथ्यते मंत्रोयंवाचकोरामोवा
च्यः स्याद्योगयुतयोः फलदश्चैवसर्वेषांसाधकानांनसंशयः यथानामवाचकेननाम्नायोभिमुखोभवेत् तथा
जीवात्मकोमंत्रेणाभिमुखोभवेत् तथाजीवात्मकोमंत्रोचिन्मयाःस्याद्वितीयस्तनिःकल्मषाःशरीरिणः उपासकानांका
र्यार्थंब्रह्मणोरूपकल्पना रूपस्थानांदेवानांअंगयुक्तास्त्रादिकल्पना मननात्त्राणनान्मंत्रोमंत्रिणांकल्पभूरुहः मूल
नात्सर्वमंत्राणांमूलाधारसमुद्भवात् मूलस्वरूपमूलत्वात्मूलतोमूलमंत्रइतिस्मृतः सप्तकोटिमहामंत्राउपमंत्राश्च
तादृशा वर्णमातृकाःस्वराःसर्वेमूलमंत्रासमन्विताः तेनाधीतंनेनतेनसर्वमनुष्ठितंमूलमंत्रंविजानातियोविद्वान्गुरुद
र्शितं मूलविज्ञानमात्रेणजीवन्मुक्तोभवेन्नरः श्रीरामादिकमैश्वर्यमंचिरादेवजायते इतिमंत्रराजार्थः मनुष्वेतेषुसर्वेषा
मधिकारोस्तिदेहिनां स्वमतुणांविरक्तानांतथाचाश्रमिणांसदा रामोध्येयः प्रणवश्चयतीनांतुविशेषतः श्रुत्युक्तत्वात्ता
रकंतंमंत्रराजस्ययत्स्फुटं ॐमईमात्राविंदुश्चनादोवर्णाःक्रमेणषट् तारकत्वात्तारकंतत्प्रत्युक्ताद्वयथार्थतो अथहैनंभर
द्वाजःपप्रच्छयाज्ञवल्क्यंकिंतारकंकिंतरतीतिसहोवाचयाज्ञवल्क्यः तारकंदीर्घानलेविंदुपूर्वकंदीर्घानलंपुनर्माय
नमः चंद्रायनमः भद्रायनमः इत्येतद्ब्रह्मात्मकासच्चिदानंदाख्याइत्युपासितव्यं अकारःप्रथमाक्षरोभवति उकारोद्वि

श्री

च. तीयान्तरोभवति मकारस्तृतीयान्तरोभवति अर्द्धमात्राश्चतुर्थान्तरोभवति बिंदुःपंचान्तरोभवति नादःषष्ठान्तरोभवति ता
रकत्वात्तारकोभवति तदेवतारकंब्रह्मत्वंविद्धीतिश्रुतिः रामेतिपरमंजप्यंतारकंब्रह्मसंज्ञितं तथाचरामरामेतिएत
१२ त्तारकमुच्यते अन्याश्चाश्रुतयःसंतिस्मृतयश्चसहस्रशः एतदेवाविमुक्तेश्रीरुद्रःकथयतिस्वकं मन्मूर्द्धोमणिकर्णिका
मर्द्धोदकनिवासिनः रुद्रस्ततारकंब्रह्मव्याचष्टेतिश्रुतेरपि सर्वेषामधिकारोस्ति न चात्रदेशकालनियमः अगस्त्यसंहितायां
तु एतदेवापर्यायोदितं शुचिव्रततमाः शूद्राधार्मिकाद्विजसेवकाः स्त्रियःपतिव्रताश्चान्येप्रतिलोमानुलोमजाः लोकाश्चांडा
लपर्यंतं सर्वेप्यत्राधिकारिणः श्रुतिर्ब्रह्माहमहर्णीस्मरनिर्वाणहुयात्मकं द्वयोर्विरोधःसंप्रोक्तोनाश्रयेतन व्यवस्थया श्रुति
स्मृतिविरोधेन श्रुतिरेवबलीयसी व्यवस्थाभावमाश्रित्यवाक्यमेतन्नियामकं षडक्षरंब्राह्मणादीनांत्रयाणांतद्विवर्णकं
अन्येषांदेशिकेंद्रेणवक्तव्यंतारकंपरं विनात्तप्रणवंमंत्रानगायत्रीश्रुतिवारणात् सावित्रीलक्ष्मीयजुःप्रणवंयदिजानी
यात्स्त्रीशूद्रस्समृतोधोगच्छतीति तस्मात्सर्वचेष्टयाचेष्टमग्र्याचार्यस्तेनैवमंत्रोभवतीतितापनीयश्रुति तथाचाहागस्त्य
मंत्रोयमुपदेष्टव्योब्राह्मणाद्यरूपतश्च्युत न न्यूनंयदन्तंवाच्यनवर्णाघडन्तरेडे· तारयेकाहीनवाश्रुतिर्व्याहृतिअंम
स्मंत्येयोगिनोनित्यंसत्यानंदेचिमात्मनामचात्मारामेतिगीयते तादात्मिकायाचतुर्थीतथावार्येतिकथ्यते मंत्रोयम्
चकोरामोवाच्यःस्याद्योगएतयोः फलदश्चैवसर्वेषांसाधकानांनसंशयः यथानामावाचकेननाम्नायोभिमुखो १२

भवेत् चिन्मयस्याद्वितीयस्य निःकलस्याशरीरिणः उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पना रूपस्थानां देव
तानां पुंस्त्र्यङ्गास्त्रादिकल्पना मननात्त्राणनान्मंत्रो मंत्रिणा कल्प्य[illegible]हः मूलं नाम सर्वमंत्राणां मूलाधारसमुद्भ
वात् मूलस्वरूपमूलत्वात् मूलमंत्र इति स्मृतः सप्तकोटिमहामंत्रा उपमंत्रास्तु तादृशाः वर्णमात्राः स्वराः सर्वे मू
लमंत्रसमन्विताः तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितं मूलमंत्रं विजानाति यो विद्वान् गुरुदर्शितं मूलविज्ञानमा
त्रेण जीवन्मुक्तो भवेन्नरः अणिमादिकमैश्वर्यमचिरादेव जायते इति मंत्रराजार्थः मनुष्वेते सर्वेषामधिकारोस्ति देहि
नां मुमुक्षूणां विरक्तानां तथा चाश्रमिणां सदा रामो ध्येयः प्रणवव्रतीनां तु विशेषतः मुमुक्षुत्वात्तारकत्वं मंत्रराज
स्य यत् स्फुटं ओं अर्द्धमात्रा विंदुश्च नादो वर्णाः क्रमेण षा तारकत्वात्तारकं तत्कुत्सकादवतार्यतां अथैनं भरद्वाजः प
प्रच्छ याज्ञवल्क्यं किं तारकं किं तरतीति स होवाच याज्ञवल्क्यः तारकं दीर्घानलं विंदुपूर्वकं दीर्घानलं पुनर्मायनमः
चंद्राय नमः भद्राय नमः इत्येतद्ब्रह्मात्मकात्मसच्चिदानंदाख्यमित्युपासितव्यं अकारः प्रथमाक्षरो भवति दात्मनि इति
रामपदेनासौ परं ब्रह्माभिधीयत इति इत्यधिकारतयः अथाभिषेकं वक्ष्यामि दीक्षाविधिमनुत्तमं उपासनशतेनापि
वितायेन न सिद्ध्यति मधुमासे भवेद्दुःखं माधवे रत्नसंचयः मरणं भवति ज्येष्ठे आषाढे बंधुनाशनं समृद्धिः श्रावणे
न्तं भवेज्ज्ञाद्रपदे त्वयः प्रजानामाश्विने मासि सर्वतः शुभमेव हि ज्ञानं स्यात्कार्तिके सौख्यं मार्गशीर्षे भवत्यपि पौषे

मं.
१३
13

त्रानन्तयोमाघेभवेत्मथाविवर्द्धनं फाल्गुनेपिसमृद्धिःस्यान्मलमासंविवर्जयेत् इतिमासशुद्धिः रवौगुरुसितेसोमेकर्त्त
व्यंबुधशुक्रयोः इतिवारशुद्धिः अश्विनीरोहिणीस्वातीविशाखाहस्तभेषुच ज्येष्ठोत्तरात्रयेषुवंकार्य्याभिमन्त्राभिषेचनं
नारदतंत्रे रोहिणीश्रवणार्द्राचधनिष्ठाउत्तरात्रयं पुष्यःशतभिषश्चैवदीक्षानक्षत्रमुच्यते इतिनक्षत्रशुद्धिः पूर्णि।
मापंचमीचैवद्वितीयासप्तमीतथा त्रयोदशीचदशमीप्रशस्ताःसर्वकामदाः मंत्रमहार्णवेहे द्वितीयापंचमी।
दशमीचापिषष्ठिवापिविशेषतः द्वादश्यामपिकर्त्तव्यंत्रयोदश्यामथापिवा इतितिथिशुद्धिः पंचांगशुद्धिदिवसे
स्वोदयेशशिनारयोः गुरुशुक्रोदयेशुद्धलग्नेद्वादशमाधितेचंद्रतारानुकूलेचशस्यसर्वकर्मसु इतिकालशुद्धिः सू
र्य्यग्रहणकालेतुनान्यदन्वेषितंभवेत् सूर्य्यग्रहणकालेनसमानोनास्तिकश्चन तत्रयद्यत्कृतंसर्वमनंतफलदं
भवेत् नमासतिथिवारादिशोधनंसूर्य्यपर्वणिददातीष्टंगृहीतंयतस्मिन्कालेगुरोरंशसिद्धिर्भवतिमंत्रस्यवि।
नायासेनवेगतः अतस्तत्रैवरामस्यमंत्रतीर्थाभिषेचनं कर्त्तव्यंसर्वयत्नेनमंत्रसिद्धिमभीप्सुभिः स्वतीर्थकविषुवासे
तत्त्वदामनपर्वणोः मंत्रदीक्षांप्रकुर्वाणोमासर्क्षादिनशोधयेत् इत्यापवादकालः उपासकस्तुशुद्धात्मागुरुपदे
नतोषयेत् स्ववित्तचित्तकायैश्चभक्तिश्रद्धासमन्वितः यथाददातिसंतुष्टःप्रसन्नोवरदोमनुं स्वयमेवतथाचैव।
मितिकर्त्तव्यताक्रमः गुरुर्विशुद्धःप्रागेकश्रद्धाहात्सप्तमेहनि संकल्पोपोष्यकर्त्तव्यमंकुरारोपणंशुभं कुर्य्याना १३

दीप्रां वेश्माङ्गणे देवैः स्वस्तिवाचनं स्वगृह्योक्तप्रकारेण ततो दत्तद्विरथीन वै वर्त्तिभिर्वर्णकैः सम्यङ्नीलपीतसितासितैः सर्व
तोभद्रमालिख्य तत्र धान्याञ्जलिद्वयं निधाय कलशं तत्र तीर्थतोयसुपूरितं वेष्टितं वस्त्रयुग्मेन पञ्चरत्नसमन्वितं
आम्राश्वत्थप्लक्षन्यग्रोधशाखाभिरुपशोभितं नारिकेलफलोपेतं मंगलैः परितो ज्वलं सर्वोत्सवसमायुक्तं कृत्वा
तत्रार्चयेद्धरिं ऋग्यजुःसामसूक्तैश्च स्मार्तैः पौराणिकैरपि मन्त्रैरागमिकैश्चैव वैष्णवैर्देवमर्चयेत् वरयेद्ब्राह्मणा
न्वासःकुण्डलाङ्गुलीभूषणैः स्थापयेत्तत्सूक्तानि मन्त्रांश्च विष्णुतत्त्वेषु भे गृहस्तत्कल्पविधिनाभ्युत्थाप्य यथा च
रेत् न्यासजालं च विन्यस्य विधिवत्तत्र पूजयेत् पूजनीयैश्च पूर्वोक्तसाधनैः प्रहर्षितमं पूर्वोक्तं नृत्यगीताद्युत्सवं त
त्र कारयेत् पुण्यपत्रीभ्यो गृहस्थेभ्यो दद्याद्भक्तसुविस्तरं गन्धपुष्पाक्षतान् फलसम्भारोभूषणादिकं भोजनं चान्नपा
नीयं चैभ्योऽपि प्रदीयेत एवं तत्रोत्सवं कृत्वा रात्रौ जागरणं चरेत् एवं दिवा च रात्रौ च त्रिकालं पूजयेत्सदा षडक्षरं जपेत्
त्पूज्योऽतिहर्षिताः गुरुः परेद्युस्तथा प्रातः पूर्ववत्सर्वमाचरेत् संक्षेपविधिना होममग्निकार्यमथाचरेत् वशिष्ठसंहितायां
तत्कुण्डलक्षणमीरितं गृहस्येशानभागे तु मण्डपं कारयेद्बुधः षड्द्वादशाष्टभिर्हस्तैः षोडशैर्वा समं ततः चतुर्द्वारसमायु
क्तं तोरणाद्यैरलंकृतं कुण्डं तन्मध्यभागे तु कारयेच्चतुरस्रकं वितस्तिद्वयखातं यत्कुण्डं स्याच्चतुरङ्गुलं विस्तारेण तु वि
याणां तत्त्रिमेखलत्रयसंयुतं वेदपातं योन्यङ्गुलाधिकं सूद्राणां हस्तमात्रकं प्रथमा मेखला तत्र द्वादशाङ्गुलविस्त

रं. ता चतुर्भिरंगुलैः तस्याश्चान्तरं तत् समंततः तस्याश्चोपरि वप्रस्या चतुरंगुलमुन्नतः अष्टाभिरंगुलैः सम्यग्विस्तीर्णोऽत
समंततः तस्योपरि पुनः कार्यो वप्रः सोपि तृतीयकः चतुरंगुलविस्तीर्णश्चोन्नतस्तु तथाविधः योनिश्च पश्चिमे भाग
१४ प्राग्ग्रीवी मध्यसंस्थिता षडंगुलैश्च विस्तीर्णा चायता द्वादशांगुलैः ऊष्ठोन्नता गजोष्ठेव सच्छिद्रा मध्यमोन्नत कंठा।
अश्वत्थपत्रमात्रः स्यात् कुंडे च करमात्रके कुंडे यत्नेन कर्त्तव्यो भुक्तिमुक्तिफलेप्सुभिः नाभिरप्यथवा कुंडे मेकमेखलकं भ
वेत् एवं लक्षणसंयुक्ते कुंडे सर्वार्थसिद्धिदे अनेकदोषदं कुंडं यत्र न्यूनाधिकं यदि तस्मात् सम्यक् परी[?]क्ष्य कर्त्तव्यं शुभमि
च्छता इष्टमात्रेऽस्थंडिले वा संक्षिप्ते होमकर्मणि इति कुंडलक्षणं वायव्ये वाथ ईशाने पूजावेदीं प्रकल्पयेत् हस्तोन्न द्यैः
तां च विस्तीर्णां चतुरस्रां समंततः शालितंडुलचूर्णैश्च नीलपीतसितासितैः रक्तारुणधूम्रगौरैश्च वर्णैर्यंत्रं समालिखेत्
रेखोदीत्या यदा तत्र वसुपत्रं निरूपितं प्रादौ रेखाश्च तद्दिक्षु दश भस्तं च कारयेत् तत्राष्टपत्रं कमलं वृत्तत्रयपरीवृ
तं सोमसूर्याग्निबिंबानि तथा कुर्याद्विचक्षणः चतुरस्रं बहिस्तस्य षट्कोणं कर्णिकांतरे पीतं पूर्वे सितं देयं पश्चि
मे पुनरेव तथा रक्तस्तु दक्षिणे कृष्णं पाटलं वह्निसंस्थितं नैरृते नीलवर्णं तु वायव्ये धूम्रवर्णकं ऐशे गौरं विनि
र्दिष्टमष्टपत्रेष्वयं क्रमः शंखचक्रगदापद्मयन्त्रवीणांश्च मंडले विलिख्य वर्णकैः सम्यक् तत्र राममथार्चयेत्
न्यायार्जितैः सायंतैः सदा न[?]मा[?]नादिकं कुर्यान्नैवेद्यो याति भक्त्या कुर्वन्नपि द्विजा मध्येषोडशकोपहानि। १४
हो वं:

येत्रार्थं परिमार्जयेत् ततः पंक्तीद्वयं मार्ज्जो दिक्षु कोणांथराग्रहं विदिक्षु च समा शिखास्तत्र द्वादशसाशयः कृत्वा पंक्तिद्वयं वाह्यं
वल्यर्थं मार्जयेत्ततः शेषपंक्तिद्वयं खङ्गि कोष्ठैर्द्वारसमं ततः शोभोपशोभा वक्रोष्ठैरर्द्धचंद्रास्त्रिभिस्त्रिभिः पंचाय
ततनदीत्वास्त्रव्येष साधारणाक्रमः कुंडांतरेष्वेवमेव मारायंजत्कुर्यान्मते इति वेदिकालक्षणं स्रुवं वा हस्तमात्रं
नहोमार्थं विदध्यीतवै चतुरस्रं विधायादौ समंपंचांगुलं क्रमात् तृतीयांशेन गर्त्तं स्यात्तदंते च त्रिशोभितं खा
तासमं तिर्य्यग्दृढं तद्वयः शोधयेद्वहिः चतुर्थांशयं चांगुलस्य शेषाचार्द्वेति दंततः रम्यां च मेखलाः खातेशिष्टेना
ईनकारयेत् ऊर्ध्वं त्रिभागविस्तारमंगुष्ठेन समायतं सार्द्धमंगुष्ठकं वा स्यात्तदग्रे तन्मुखं भवेत् चतुरंगुलविस्ता
रंचांगुलमथापिवा त्रिद्व्यांगुकं तस्य मध्यान्नातु सुशोभनं सुविवरं कंदेशस्याद्विशेषाय वक्तनीयसी शोषं
दि दंतं कर्त्तव्यं यथा[illegible]विवित्रकं चतुः कोणसमायुक्तो हस्तमात्रः स्रुवो भवेत् चतुर्कं शोभनं हस्तं द्व्यंगुलं विद
धीतवै यथाल्पयंके गोष्ठादंत चिरंतपयेततथा पालाशपत्रेनिश्छिद्रे कृविरेस्तक्त्तु वो मतेन विदध्याद्वास्तस्या
पेत्रसंदितेन होमकर्मणि इति स्रुक्स्रुवौ ततः कुंडस्थूलं सम्यग्गोमयेनोपलिप्य च आदौ वह्निमृ(?)केकुर्याद्
पवित्र सविष्टरे प्राणानामस्य मंत्रसाज पन्मंत्रमतन्यधीः यावन्मर्हत्तं स वति सर्वांगेषु पिनिश्चयः संकल्पं स्थ
डिले कुंडे कृत्वा लेखामध्यतः षट्षट्कोणां त्रिकोणां वा वह्निमत्रादध्यीतवै योद्योपसार्यं तत्पश्चद्वना विष्टरमादरात्

चं.
१५
15

लक्ष्मीस्तत्रमंत्रीतत्रप्रभोनारायणास्यच यामयधर्मेणसंज्ञानमग्निंतत्रविचिंतयेत् प्रमथ्यविधिनेवाग्निमाहितोग्नेर्गृह
दपि स्थानीयवाद्धीनात्रकुशैः प्रज्वालयत्ततः संशोध्ययात्रैकैकाष्ठैः पुनःप्रज्वालयेदपि प्राणायामंततःकृत्वा
परिस्तीर्यकुशांकुरैः स्वगृह्योक्तविधानेनवामदेवादिभिर्मन्त्रैः पात्राण्यप्यासाद्यविधिवदिध्ममंत्रवित् तान्येवस
पवित्रेणैवोत्तानानिविधायच प्रतप्योद्वासनेयत्वात्रपरिपूर्णाभ्यांभावुना दत्वाहुतान्यविंत्रवत्प्रोक्षूपनिधायततः
दिग्पुरस्तात्तत्याज्यंप्रणीतेनस्रुच्यतेबुधैः तत्रार्चयेत्स्रुभिर्विस्त्रवलाणांबालौणांअंतेश्चाज्यंसंस्कृत्यविधिवत्स्त्रुवक्त्रवा।
वोमितिब्रुवन् गर्भाधानादिकंवक्रविवाहान्तंसमाचरेत् अष्टावष्टावतारेणैवैकैकस्यात्रकर्मणः जुहुयाद्विचिंत्यव
क्रौवौषडंतंसमाप्यच कर्मान्तरंसमारभ्यतदप्येवंसमापयेत् इध्माधानादिन्निमुखाज्यभागौजुहुयात्ततः अत्य
ग्निमुखं पवमग्नेःस्वसंपन्नैवेल्लवंस्थापयेद्बुधः सांगाद्वानमंत्राग्नेःसृजयेद्गुरुनायकं समिदाज्यचरूणांचप्रत्येकंषो
डशाहुतीः जुहुयान्मूलमंत्रेणपरिवारेभ्यएवच त्रिसोवैनायकादिभ्यःसर्वेभ्योप्याहुतीर्बुधः द्वारांगपरिवारेभ्यः
स्त्रेभ्योजुहुयात्ततः कृत्वाज्येनाहुतीस्तत्रप्रदद्यात्तदाग्नये ततद्वैवश्चजुहुयात्सर्वंचरुमनोहरे द्वारपीठस्त्रेभ्य
श्चहुत्वादौजुहुयात्ततः अग्न्यादिवेस्तवांतेभ्यस्तिस्त्रश्चात्याहुतीःपृथक् ततःस्विष्टकृतंहुत्वाहूतेनमुनिसत्तमः
जलेनविधिनासम्यक्त्रिशिरव्यसमंततः प्रणीतामार्जनंकृत्वादद्याच्चबलदक्षिणां स्वस्ववित्तानुसारेणालोभ १५

मोहविवर्जितः ततोब्रह्माणमुद्वास्यब्राह्मणान्भोजयेदथ अग्निमध्यगतंदेवंपुनःस्वात्मनियोजयेत् एकीभूतंविचिंत्यैवंवा
चयन्स्वस्तिवाचनं आशीर्वचोभिर्विद्वद्भिः पूर्णमानःसुखीभवेत् हुतशेषंततःप्राश्यपःकंकंयंउप्रमाणाक मंत्रितंरामा
गायत्र्याततस्तस्मैबलिंहरेत् मंत्रविपिंदेवस्यवाह्यान्तर्दिक्षुबान्धवा नित्येनैमित्तिकेकाम्येयेदग्निस्थंवस्तुं सर्वदा।
भ्युदयश्राद्धमेककारयेत्पूर्णतथा आदावेवप्रकुर्वीतकर्मणोभ्युदयार्थतः इतिहोमविधिः कलशस्थापनमायद्या।
सुषुम्नाञ्जलिपुनः ततःशिष्यमुपानीयभक्तिनम्रमकल्मषंप्राणायामपविधिवद्भूतशुद्धिंविधायचसुरास्त्वामभिइति
मंत्रैस्तुबहुभिर्ब्राह्मणैःसह अभिषिंचेचतन्मूर्ध्नितदेतत्कलशोदकैः सुरास्त्वामभिषिंचंतुब्रह्मविष्णुमहेश्वराः
वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः प्रद्युम्नश्चानिरुद्धश्चभवंतुविजयायते आखंडलोग्निर्भगवान्यमो
वैनिरृतिस्तथा वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः ब्रह्मणासहिताशेषोदिक्पालाःपांतुतेसदा की
र्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः बुद्धिर्लज्जावपुःशांतिर्मायानिद्राचभावना एतास्त्वामभिषिं
चंतुपुष्टिःकांतिस्तथातथा आदित्यश्चंद्रमाभौमोबुधजीवसितार्कजाः ग्रहास्त्वामभिषिंचंतुराहुकेतुश्चपूजिताः
देवदानवगंधर्वायक्षराक्षसपन्नगाः ऋषयोमनवोगावोदेवमातरएवच देवपत्न्योद्रुमानागादैत्याश्चाप्स
रसांगणाः अस्त्राणिशस्त्राणिराजानोवाहनानिच औषधानिचरत्नानिकालस्यावयवाश्चये सरितःसागराः

व. शैलात्तीर्थान्निजलदानदाः पतेत्त्वामभिषिंचंतु सर्वकामार्थसिद्धये इति वशिष्ठसंहितायां अभिषेकमंत्राः नाराय
णः स्वयं रामः शिष्यमत्त्रिदयातवे सर्वगः सर्वतोप्यत्तिप्रसीदत्तु दयानिधिः इति संस्मरन्संस्मरन्पतज्जलैरभिषेच
१६ येत् परिधाप्य वासस्त्रं चेदनाद्यकरोप्यच कंडुले वांगुलीयं च भारयित्वाम्यमेतनतः वेत्सवीमातृकां चैव तत्त्वन्या
सविशारदः तन्मूर्तिपंजरन्यासमन्त्रष्यादिन्यासमेवच सर्वविहितविधिवदिष्यत नादेवं प्रविन्यसेत् ततस्ताच्छिरसि
16 स्वस्य हस्तं दत्वा शतं जपेत् अष्टोत्तरं ततो मंत्रं दद्यादुदकपूर्वकं भावयोस्त्वल्पफलदो भवेत्तेवमदीवयेत् प्र
सन्नवदनस्तस्मै शिष्याय मुनिपुंगवः स्वतोज्योतिर्मयीं विद्यां गच्छंतीं भावयेद् गुरुः आगतां भावयेच्छिष्योथन्यो
स्मीति विशेषतः कृतकृत्यस्तथा शिष्यः सर्वं तस्मै निवेदयेत् यद्वयावच्चतद्भक्त्या गुरवे वरुष्ठचेततः गोभूहिर
ण्यविपिनगृहदेशादिकं बहुतं चेदर्द्ध वा तदर्द्धं ग्रामथापि वा अक्लेशादन्नवस्त्रादि दद्याद्वित्तानुसारतः श्री
भागवते अयदेहि सद्विप्रेभ्यः कर्त्तव्यं गुरुरति कृतं यद् वै विष्णुइभावेन सर्वार्थात्मार्पणं गुरौ इति प्रकारांतरमाले
वयगुरुं पत्नीं नतो घयेत् गुरुपुत्रकलत्रादीं तोषयेत्कनकादिभिः अर्हणाभिश्च बहुधा भक्त्याच्छादनभूषणैः प
वमुक्तप्रकारेण गुरवे वदनदक्षिणाः कृतकृत्यस्ततथात्मानं मत्वा विप्रांश्च भोजयेत् तेभ्योपि दक्षिणां दत्वा सर्वं तत्परि
पूरयेत् ब्राह्मणाशीर्वचोभिश्च गुर्वाशीर्भिः समेधितः विसर्ज्जयेच्च गुर्वादींस्ततो भुंजीत मंत्रवित् एवं लब्ध्वा मंत्र

रग=

वा

विघ्नः कृतार्थस्यानुसंशयः इतिदीक्षाप्रकारः दीक्षावद्येषथसंदेयान्नसक्तावार्य्यसम्पत्तांतत्त्वसारे मंदैवेक्षातदा
दीक्षागुरोराज्ञानुरूपतः नतिथिनार्चनंहोमोनस्नानंनजपक्रियाः दीक्षायाकारणंकिंतुस्वेक्षावाञ्छेनसद्गु।
राविति तदेवलग्नंसुदिनंतदेवताराबलंचंद्रबलंतदेव विद्याबलंदैवबलंतदेवलक्ष्मीपतेस्तेंघ्रियुगंस्मरा
मि इतिदीक्षामात्यकालः मुहूर्तेसर्वतोभद्रेनवकुंभंनिधायच मोदकंगंधपुष्पाभ्यामर्चितंवस्त्रसंवृतं
सर्वौषधीपंचरत्नपंचपल्लवसंयुतं ततोदेवार्चनंकृत्वाङ्गदेहोमंतरंशतं शिष्यंस्वलंकृतंचैवासनंपश्चिमेउपवे
शयेत् मंत्रितंचोदिताणीतोयैश्शांतिकुंभजलैस्तथा मूलमंत्रेणाष्टशतंमंत्रितैरभिषेचयेत् अथसंपादयेत्स
न्नेहस्तंशिरसिधारयेत् समोस्त्वित्यन्नतान्दद्यादथशिष्योर्चयेद्गुरुं इतिसंक्षेपदीक्षाः अत्रोप्यशक्तःकश्चि
च्चेदङ्गमप्यर्घमात्रतं तदेवुनाभिषिच्याष्टवारंमूलेनकेकरे निधायायामंजपेत्कर्णेउपदेशोत्वयंविधिः चं
द्रसूर्यग्रहेतीर्थेसिद्धदेवेशिवालये मंत्रमात्रप्रकथनमुपदेशःसउच्यते उपदेशः द्विविधंस्यात्स्वप्नम
नोर्बाह्यान्तरमुपासनं न्यासिनंचान्तरंप्रोक्तमन्येषामुभयंस्मृतं पंचवर्णात्मिकाशक्तिविद्याव्योमसमुद्रा।
हृता नादात्मिकोशिवहेसंहृत्यात्मानचिंतनं चात्मनस्तत्वचिंताउपास्यादृष्यात्मानुचिंतनं उभयोरैक्यचिंता
तनङ्गवांतकमानरंद्व्यायारायनेवाहंगृहस्पस्यतदप्यथ तदेवोक्तंसंहितायांशंभुनाशंभवीप्रति नग्न

हीतानमात्रेणापरेत्रेहृचमंगलं प्रोक्तोमिनिचंद्रवदनेदानहोमादिभिर्विना गृहस्थोयदिदानादिदयान्नजङ्गयाद
र॰ पि प्रजयेदिद्विधिनानैवकश्चिद्यदितदतद्वद्ध नबह्मचारिणोदानमधिकारोस्तिभामिनी गुरुभ्योन्यत्रसंभ्यः को र्दै=
१२ वादास्यन्नुपेतितं नारण्यवासिनांशक्तिनात्रसंतिकलौयुगे परिव्रज्ञानमात्रेणादानहोमादिभिर्विना
सर्वदुःखविपिशाचेभ्योमुक्तोभवतिनान्यथा परिव्राडोविरक्तश्चविरक्तस्तुगृहीतथा कंभीर्याकेतिमज्येत।
तावभोकमलाननं प्रायपत्रियोगृहस्थाश्चमंगलेमंगलार्थिनः पूजोपकरणाद्कर्थ्यरत्नदानानिवारणं वा
नप्रस्थाश्चयतयोयथैवंकर्यंरत्वंद संसारान्ननिवर्तन्ते विध्यातिक्रमदोषतः श्राद्धपतितांयेतेभवेयुर्दुःखभाज
ने अहिंसापरमोधर्मस्तेवामेषानपद्धतिः नहिंसान्यतिरेकेणालभ्यंतेतानितानिवै भावनाकल्पितैः पूजासा
रै= धनैर्वयज्यते नवहिर्योगयुक्तानामंतस्तेषांप्रशस्यते आत्मानंशमसंतेरामंसंभावविदंरतियं नतेषांदुष्कृ
तंकिंचिदुष्कृतेनाथानचापरः परिभिर्भावितैर्द्रव्यैः पूज्योरामोत्वहंततः संपादितैर्गृहस्थैश्चसपवक्रमउच्यते
रत्नपासनविता इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्मुकुंददेवनश्रीचरणशिष्यानंददेवनविरचिता
यांश्रीरामार्चनचंद्रिकायांप्रथमः पटलः वदंतितत्तत्वविदस्तत्वंयज्ज्ञानमद्वयं ब्रह्मेतिपरमात्मेतिभगवानिति।
तिशब्द्यते नवदयानामनयोत्तानवैराग्ययुक्तया पश्यंत्यात्मनिचात्मानंभक्त्याश्रुतगृहीतया अतः श्रीभिद्ध १८

जेष्ठेण वर्णाश्रमविभागशः स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणं तस्मादेकेन मनसा भगवान्सात्वतां प
तिः श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा अव्यक्तब्रह्मस्तवीहु निर्विघ्नेन परं व्रजेत् दुर्जयो ह्यरिषड्वर्गो
ह्यं — मूर्तं ब्रह्म ततो भजेत् इति भक्तेर्दाढ्यं विना स्वधर्मेयत्किंचिद्देवताराधनादिकं सर्वो नश्यति तत्तस्मात्कल्याणं तेम
स्तु कृत्स्नमेव तत् इति स्वधर्मनिष्ठा ब्राह्मे मुहूर्ते चोत्थायाचिंतयेद्रघुनंदनं रामा रामेति रामेति नावकाण्वप
रंशुभं श्रीपूर्वं जयमध्यस्थं द्विर्जयांतं विचक्षणाः प्रातः स्मरामि दिननायकवंशभूषं वेदांतवेद्यमभयं कृतरा
जवेषं वैदेहिलक्ष्मणयुतं स्वजनाभिरामं संसारसर्पगरलोपशमाय रामं प्रातर्नमामि चरितं निहितं वरा
मस्य तस्य पलभक्तहृतांतकस्य यः सिंधुबंधकथया भवबंधहंता राज्यं ततो तिविभीषणराज्यसंस्था २ प्रा
तः करोमि कलिकल्मषनाशकर्म तत्कर्मकं भवतु भक्तिकरं परं मे अंतःस्थितेन सुषमातविदात्मकेन रामेण
वाक्यगुरुदेहवनानियुक्तः ३ श्लोकत्रयं यः पठति प्रभाते श्रीरामचंद्रार्पितचित्तवृत्तिः आयुः श्रियं कीर्तिमनंतसौ
ख्यं लब्ध्वा विरामपदं समेति ४ गर्ववर्थं त्यक्तराज्यो व्यचरदनुवनं पद्मपद्भ्यां प्रियायाः पाणिस्पर्शाक्षमाभ्यां मजि
तपथिरुजो यो हरीन्द्रानुजाभ्यां वैरूप्यात्सूर्पणख्याः प्रियविरहरुषारोपितभ्रूविजृंभत्रस्ताब्धिर्बद्धसेतुः खलदव
दहनः कोशलेंद्रोवतान्नः इति स्मरणं संध्यासुदङ्मुखो ह्यन्यपि निक्षिप्य तर्दिनगास्या निवीती कुर्यान्मूत्र

वं=

वं· द्विम्रोवंवहिरथेशलिलातत्रलिंगेमृदेका पंचापानेथहस्तेदशभतस्तभयोःसप्तचैतन्हहस्तयोर्द्वेगुणापादिकमात्तइति
वनियतिषस्मात्तदर्द्धंनिशायां इतिमूत्रोत्सर्गः कृत्वालमादशौचंविमलमथजलैस्त्रिःपिबेत्स्पृशेद्दीर्घान्यंग
२८ ष्ठकाभ्यांसजलमभिमृशोन्नाशिकारंध्रयुग्मम् अंगुष्ठानामिकाभ्यांनयनयुगमथोतंककर्णयुग्मंकनिष्ठांगु
ष्ठाभ्यांनाभिदेशोहृदयमथतलेनांगुलीभिःशिरोगं इत्याचमनविधिः दंतोद्भेदोवितस्त्यां भवतिपरिमि
196 तादायुरित्यादिमंत्रात्स्नातःक्षीर्यादिकाष्ठाहृदंवदिरपेश्वरविंतामार्कविल्वे भक्त्यांगंरूपवकादिरपिकृशा
म्रेतोदेशोनीमंगुलीभिर्नदाभूताश्चताष्ठपर्वण्यपिनखलज्जवमर्कपाते स्नानायायसूहृदयं शंसोमांप्र
जायमानामृतसमेमत्वेषप्रमादेनेयश्शम्नाचभगेनच इतिदंतधावनमंत्रः सर्वाणिखानिसंशोध्यशुचिर्भू।
त्वविशेदत्तणं स्वस्तिकाद्यासनेध्यायेद्रघवं स्वस्वरूपिणं अहंरामोनचान्योस्मिब्रह्मैवाहंनशोकभाक् स
च्चिदानंदरूपोहंनित्यमुक्तस्वभाववान् इतिभावना त्रैलोक्यचैतन्यमयादिदेवश्रीनाथविष्णोभवदाज्ञयैवप्रा
तःसमुत्थायतवप्रियार्थंसंसारयात्रामनुवर्तयिष्ये जानामिधर्मंनचमेप्रवृत्तिर्जानाम्यधर्मंनचमेनिवृत्तिःके
नापिदेवेनहृदिस्थितेनयथानियुक्तोस्मितथाकरोमि इतिप्रार्थनाविधिः शुचौदेशेविधानेनस्नानायछलसूत्रकं
यज्ञोपवीतमिनिततन्मंत्रेणाधारयेच्छुभं दद्याद्गणाभिमुखोर्ध्वःकुर्यात्केशप्रसाधनं स्मृतोकारंचगायत्रीनिवधीया। २८

ष्ठिवांततः पीतांबरणिदर्भांश्च गृहीत्वा मृत्तिलांस्तथा नद्यादितीरमागत्य स्नायात्स्वस्वविधानवत् अथैतेन च वक्ष्येण नित्य
नैमित्तिकीं क्रिया कुर्वन्फलं न चाप्नोति दत्तं भवति निष्फलं पीतांबरपाणिरेवातः कुर्यात्संकल्पमादृतः रामार्चनगतया
स्नानं करिष्येहं तदा तया स्नानं स्यात्कोटिगुणं दिव्यं दशसहस्रसमुद्भवं दर्शेवगाहेर्भूत्यां वागोरजोभिर्भवति विपदित
केवलेर्बापि मंत्रैः स्यात्पंचोद्धृत्य पिंडास्त्रयपूर्या मिश्रितानि तस्मात्तान्वर्ज्य सिंहान्या कर्कटादौ परिज[illegible]धिगतालो
रनिहांश्चयुक्तानवस्थितं पुंडरीकाक्षं सैन्यमूर्तिप्रभुं स्मरेत् अनंतादित्यसंकाशं वासुदेवं चतुर्भुजं शंखचक्रगदाप
द्मकुटं वनमालिनं दिव्यचंदनलिप्तांगं चारुहासं शुभेक्षणं नारदाद्यैः सेव्यमानं भास्वद्विपलकंकणं सकिंकि
णीककेयूरहारिणं मणिनूपुरं ध्वजवज्रांकुशालद्व्यपादपंकेरुहद्वये तत्पादोदकजां धारां निपतंतीं स्वमूर्द्धनि विं
तयेद्ब्रह्मरंध्रेण प्रविशंतीं स्वकां तनुं तया संक्षालयेत्सर्वमंतर्देहगतं मलं तत्क्षणाद्विरजा मंत्री जायते स्फटिकोप
मः इदं मांत्रं वरं स्नानं सहस्रादधिकं स्मृतं कृत्वादौ वैदिकं स्नानं ततस्तांत्रिकमाचरेत् विन्यस्यांगे षडंगानि प्राणाया
मपुरःसरं श्रीसूर्यमंडलात्तीर्थमाकृष्यांकुशमुद्रया वमित्यनेन चाप्लाव्य कवचेनावगुंठयेत् संरक्ष्यास्त्रेण मूलेन
जल्केषु स्वरान् तत्पत्रेषु अष्टसु पूर्वादिक्रमेण सप्तचत्वारिंशत्कालमंत्राणां षट्षट्संख्याकानष्टमे पंचसंख्याकांल्लि

न. खेत् हुंजानकीवल्लभाय स्वाहेति दशाक्षरेण वहिर्वेष्टयित्वा तथैव कादिक्षांतैः स्वरादि विदिक्षो दिक्षु हुं इति नृसिंहवराहवीजे
५४ लिखेत् क्षेवं स्वाहे इति मन्त्रमेय यंत्रं महत्या सहितायां यद्दृष्टं प्रोक्तं तत्र अगस्त्यः वक्ष्यामि रामभद्रस्य यंत्रं कवचसंज्ञि
तं धारणात्तस्य मर्त्यानां जायंते सर्वसिद्धयः नश्यंति सर्वपापानि विपदो यांति संक्षयं भूतप्रेतपिशाचाद्याः पला
54 यंते च दर्शनात् मंत्राणि स्थिरतां यांति शत्रवो यांति मित्रतां ग्रहाः प्रसादतां यांति दासतां यांति महीभृतः कि
मत्र बहुनोक्तेन नास्त्यनेन सुदुर्लभं यंत्रेण रामभद्रस्य वज्रपंजरसंज्ञिता कोष्ठैः सहैकविंशत्या पंक्तिद्वयविभूषि
ते विन्यसेत् उत्तमं चक्रमेतस्मिन् कवचे लिखेत् द्वादशाक्षरवर्णानि यग्रहाद्येषु विन्यसेत् सत्रेलामविलोमाभ्यां प्राद
क्षिण्यक्रमेण च राघवादीनि नामानि नमस्कारेण योजयेत् मेधिरः पात्विती च स्यात् सर्वतो वाक्ययोजना सा
ध्याख्यां संयुतां षष्ठ्या स्वाहेत्येकादशे गृहे स्वकाशमशक्तिवाग्वर्णनारसिंहमतः परं लक्ष्मीपाशांकुशाणामिवा
राहं फट्स्वरूपकं स्वाहेति रामभद्रस्य द्वादशाक्षरमीरितं सौवर्णे राजते पत्रे भूर्जे वा सम्यगालिखेत् अथवा ताम्र
पत्रे च मल्लकी हात्प धारयेत् यावज्जीवं तु सौवर्णे रौप्ये विंशतिवार्षिकं भूर्जे द्वादशवर्षाणि तदर्धं ताम्रपत्रके
पत्रे लेख्यं विशेषेण यंत्रशक्तिः प्रतिष्ठिता एतां रामबलोपेतामित्यादिश्लोकषट्कं यंत्राद्बहिः प्रदेशान्तु हस्ताकारेह
न्नालिखेत् सर्वदुःखोपशमनं सर्वोपद्रवनाशनं आयुरारोग्यमैश्वर्यपुत्रपौत्रवर्द्धनं सर्वान् कामानवाप्नोति विस्त

लोकं सङ्कृति अस्यार्थः वक्ष्यामीत्यारभ्य वज्रपंजरसंज्ञितेनेत्येवं स्पष्टं दक्षिणोत्तरेखाद्वयस्योपरि प्राक्पश्चिमायामरेखाद्वादश
केऽपि निहिते द्वाविंशतिकोष्ठकानि भवन्ति अन्तिमकोष्ठद्वयमध्यगतेन रेखायाकरणेनैकविंशतिसाईपंक्तिद्वयविभूषितं उत्तमं
चक्रं विन्यसेत् श्रीरामकवचं लिखेत् तद्यथा द्वादशाक्षरमंत्रवर्णानां मध्ये एकैकेन रामचन्द्राय नमः मे शिरः पात्विति यो
जितं संपुटितं तेनैकैकपदमेकैकस्मिन्कोष्ठे दक्षिणेपतलिखेत् एवमपरिपंक्तावानुलोम्येन तद्दशपदानां समादेशः अथ
त्तनपंक्तौ प्रातिलोम्येन पुनर्विपरीतपरीतेनैव मंत्रवर्णेनैकैकसंपुटितानां उपरितनानां दशपदानां समादेशः एकाद
शकोष्ठे द्वादशसर्वरितं वर्णद्वर्णद्वयं ततो ऽमुकस्य रक्षां मध्ये पार्श्वयोः ऊरु ऊरुतदेव वर्णद्वयं विपरीतं लिखेत् एवमे
कविंशतिकोष्ठकानां विनियोगः तदेव द्वादशवर्णात्मकं मंत्रं दर्शयंति स्वेत्यादिना सौवर्णश्त्यादियंत्रशक्तिः प्र
तिष्ठितेत्यर्थं स्पष्टं तत्र यावज्जीवमित्यादिना त्रपत्रयेण सर्वयंत्रसाधारणं एतामित्यादि श्लोकषट्कं यंत्राद्बहिः स्यात् लेख
नं यथा भवति तथा लिखेत् शेषं स्पष्टं नमन्ति गुरवो यस्यैव दीक्षाविधिक्रमः रामरक्षां वदन्ते तत्र लक्ष्मीदलमर्पयेत्
दीक्षान्तरश्रुतेनापि तेन तत्फलमवाप्यते अस्यगायत्रेण चोक्तत्वात् रामरक्षासमं नहि षादक्षिण्यक्रमेणाचेति चकारसूचित
र्थं यंत्रयानेरोक्तं द्वहत्रं हंसोऽयं तस्य जीवस्यात्मधे वीजादयोन्यसेत् हंसः सोऽहमिति प्राणेश्शान्त्या विक्रमाल्लिखेत्
ईदृतेनेन्यसेत्यार्भिउं अंत्रोत्तेतथैव च विशेषो हृदलादौ तु गायत्रीं लेखमेस्तरः यंत्रराजाय विद्महे वरप्रदाय धीमहि

चै.
५५

तन्नो यंत्रः प्रचोदयात् इत्यर्णान्मंत्रगायत्र्याः प्रतियंत्रं विशोलिखेत् अग्रेवाथावकाशेन प्रतिष्ठां प्राणदां लिखेत् प्रयोगसारे
भूमिस्पर्शं शवस्पर्शं हीक्षितं निर्माल्यसंगतं दग्धमालेखितं शीर्णं यंत्रं जातु न धारयेत् इति सर्वयंत्रसाधारणक्रमः इत्य
ष्टमं यंत्रं इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्मुकुंदवनश्रीचरणशिष्यानंदवनविरचितायां श्रीरामार्चन
चंद्रिकायां चतुर्थः पटलः ४ चैत्रादिमासकृत्यं पुण्यतत्प्रकाश्यते रामभक्तस्य सिद्ध्यर्थं यदुक्तं नारदादिभिः मधु
शुक्लतृतीयां च जानकीरमणं प्रभुं राजोपचारैः संपूज्य मासमान्दोलयेत्कलौ दक्षिणाभिमुखं देवं दोलमानं स
वेश्वरः दृष्टजितं सकृद्दृष्ट्वा सर्वपापैः प्रमुच्यते दोलारूढं प्रपश्यंति ये कृष्णं मधुमाधवे अपराधसहस्रैस्तु मुक्तास्ते नात्र सं
शयः दोलारूढस्य देवस्य ये कुर्वंति जागरं सर्वपुण्यफलावाप्तिर्निमिषे निमिषे भवेत् इति गारुडे दोलोत्सवः चैत्र
शुक्लनवम्यां तु कर्तव्यं व्रतमुत्तमं अगस्त्यसंहितायां यन्महत्यां समुदीरितं श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहाधिका
तस्मिन्दिने महापुण्ये राममुद्दिश्य भक्तितः यत्किंचित्क्रियते कर्म तद्भवेदक्षयं फलं उपोषणं जागरणं पितृनुद्दिश्य तर्प
णं तस्मिन्दिने तु कर्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः रामप्रपत्परं ब्रह्म तद्दिने राम तोषणं इत्यादिनैमित्तिकम नित्यं नैमित्तिकं का
म्यव्रतं चेति विचार्यते निष्कामानां विधानां तन्न काम्यं तावदिष्यते समुदतोपि हि सदा रामनवमीव्रतं तत्पर्जे हि
रन्येषां देवदोषापि विशेषतः इति सदा यदस्य ग्रहणादेतत्स्तुतिपरं न हि नैमित्तिकं च न तथा सदेति श्रूयते यतः यावज्जीवं वि

भाव्यातं सदा पार्थान चान्यथा चैत्रमासे नवम्यां तु शुक्लपक्षे रघूत्तमः प्रादुरासीत्पुरा ब्रह्मन् परब्रह्मैव केवलं तस्मिन्दिने तु कर्त्तव्यं
उपवासव्रतं सदेति नित्यमेव भवेत्तस्माच्छ्रीरामनवमीव्रतं न तस्य स्यान्नित्यत्वं प्रत्यवायात्फलाश्रुतेः सूर्यग्रहे कुरुक्षेत्रे
महादानैः कृतैर्मुहुः यत्फलं तदवाप्नोति श्रीरामनवमीव्रतादित्यादि भिरेवं फलश्रुतेर्नित्यलक्षणाभावत्वाच्चाथवा न नित्यता
तन्नाश्यो ग्रहदोषादौ विरोधतः नान्योप्युपकारणोऽस्य महादोषश्रुतेस्फुटं प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः उपो
षणं न कुरुते कुम्भीपाकेषु पच्यते यस्तु रामनवम्यां तु भुंक्ते मोहाद्विमूढधीः कुम्भीपाकेषु घोरेषु पच्यते नात्र संशय इत्यादि श्रु
तः स्वीकरणे दोषविध्वंसे नित्यता स्थिता कुर्याद्रामनवम्यां य उपोषणमतंद्रितः मातुर्गर्भमवाप्नोति नैव रामो भवेत्स्वयं न
स्मात्सर्वात्मना सर्वैः कृत्वैव नवमीव्रतं मुच्यंते सर्वपापेभ्यो यांति ब्रह्म सनातनं इति पापक्षयद्वारा मोक्षार्थत्वं चागस्त्ये
न संयोगपृथक्त्वेन विरुद्धे फलनित्यते नित्यानामपि दर्शादियागानां नित्यताश्रुते न त्वर्थवादरूपं स्यात्फलं यापक्षया
दिके फलं स्यादर्थवादाय द्रव्यसंस्कारकर्मसु प्रतिज्ञायां तु नैवं स्याद्धि विधाया फले सति संस्कारत्वांगकर्मत्वं तत्स्यता
नामिह कर्मणि भूतभाव्युपयोगं हि द्रव्यं संस्कार्यमिष्यते नोपयुक्तः प्रमाणत्वप्राप्त्या नोपयोक्ष्यते नाप्यंगत्वं प्रधान
स्याश्रवणादिह कस्यचित् प्रधानं फलसंबंधितद्योग्यांगमिति स्थितेः जुह्वादिवच्च कर्मांगद्रव्यत्वेन नावकल्पते प
रार्थत्वनिदानं च तन्नैवात्रावकल्पते न त्वर्थवादहीनानां विधीनां विधिता कथं अर्थद्वयपरत्वे तु वाक्यभेदः प्रस

चं. ज्यते मैवमर्थद्वयं युक्तं भगविसत्वादियोगवत् तस्मात्पदद्वयद्वारा मोक्षार्थत्वाच्च नित्यतः न्यायोपबृंहिता ह्यास्तान्तेन व्याप्यावेदि
भिः इति रामजन्मनवमीनित्यता शुद्धाविद्धेति भेदेन नवमी सद्विधा मता सामान्यूनाधिका चेति शुद्धापि नवमी त्रिधा पु
५६ नर्वसुऋक्षसंयोगवियोगाभ्यां तु षड्विधा समादिकत्वयोगा विभेदैर्विद्धापि षड्विधा एवं द्वादशधाभिन्ना नवमी तत्र निर्ण
यः महाफलप्रदा शुद्धा पुनर्वसुऋक्षयोगतः चैत्रमासे नवम्यां च जातो रामः स्वयं हरिः पुनर्वसुऋक्षसंयुक्ता सा तिथिः सर्व
कामदा पुनर्वसुऋक्षसंयोगः स्वल्पोपि यदि दृश्यते चैत्रशुक्लनवम्यां तु सा तिथिः सर्वकामदा श्रीरामनवमी प्रोक्ता कोटि
सूर्यग्रहाधिका चैत्रशुक्ला तु नवमी पुनर्वसुयुता यदि सैव मध्याह्नयोगेन महापुण्यतमा भवेत् मेषं पूषणि संप्राप्ते लग्ने कर्क
टकाह्वये आविरासीत्सकलया कौसल्यायां परः पुमानिति केवलापि सदोपोष्या नवमी शब्दसंग्रहात् तस्मात्सर्वात्मना सर्वैः कृ
तैव नवमीव्रतमिति सर्वैरिति सर्वेषामधिकारः प्रकाश्यते विद्धे वेद्धे ऋक्षसंयुक्ता व्रतं तत्र कथं भवेत् विद्धानिषेधश्रवणान्नवमी
चेति वाक्यतः नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः उपोषणं नवम्यां वै दशम्यामेव पारणमिति विष्णवानां विशेषात्तत्र
विष्णुपरैरिति दशम्यादिषु वृद्धिश्चेद्विद्धा त्याज्येव वैष्णवैः तदन्येषां तु सर्वेषां व्रतं तत्रैव निश्चितं दशम्यामेव शब्देन दशमी नैव लंघ
येत् निश्चित्यैवं विचारेण नवमीव्रतमाचरेत् इति श्रीरामजन्मनवमीनिर्णयः वैष्णवैरिति वाक्याद् तेषां लक्षणमुच्यते सैंगस
मुद्रस्न्यासं सञ्चषिद्धेदेवं सदीक्षाविधिसव्यानं सर्यं द्वादशाक्षरं अष्टाक्षरमथान्यं वा ये मंत्रं समुपासते ज्ञेयास्ते वैष्णवा लो ५६

केचित्पूर्वंनरत्ताःसदा सदीक्षाविधिमागंदामंत्रराजंसयंत्रयंसहस्रात्तरसंयुक्तंमूलसंहितादिभेदतः पचार्थ्यंततनइपंचयेदिशाःसमुपा
सते महावैसवसंज्ञास्तेमहाविस्तारतिप्रियाः नचलतिनिजवर्णधर्मतोयस्सममतिरात्मसुहृद्विपक्षपदे नहरतिनवहंतिक
श्चिइच्चैर्निजमतसंतसवैहिवैस्सवाग्रामितिपाद्मे त्रिभुवनविभवहेतवेप्यकुंठस्मृतिभिर्दिसुग्यान् नचलतिभगवत्पदारविंदा
ल्लवनिमिषार्द्धमपिसवैस्सवाग्र्याः इतिभागवतेश्त्यावैचैसवलक्षणं अस्यार्थेशरीरस्येन्यादिसर्वाविलोकयेस्यायेमेकादशि
गर्मानित्यत्वादस्यकर्मणः अलंकारंपुष्पवस्त्रगंधधूपान्नलेपनं उपवासेनदुष्यितउपण्पक्षीणेंगनथ्याजनं सनंहलमनंहलम
भोजनभोजनं मन्वादिस्मृतिभिः प्रोक्तंचतुर्विधमुपोषणं निराज्ञादिमनोहलमेकादश्यादिभोजनं अतोहलंचपक्षांतेसभोज
नमुदाहृतं पकभक्तेननक्तेनायाचितेनहविष्यतः पयोमूलफलैर्वापिवालवृद्धातुरःक्षिपेत् हविष्यभोजनंस्नानंस
त्यमाहारलाघवं अग्निकार्यमधःशय्यांनक्तभोजीषडाचरेत् अष्टोतान्यव्रतघ्नानिआपोमूलंफलंपयः हविर्ब्राह्मणका
माय्युगरोर्वचनमौषधं इतिप्रतिनिधिः व्रतीन्द्राणामाहचागस्त्यप्रकारः सोभिधीयते क्रमेणयेजपन्सम्यक्लोककर्मार्थव्रता
र्थिनः षडक्षराधिकेराममंत्रैःस्यान्हजनंयथा सर्वेषांराममंत्राणांमंत्रराजःषडक्षरः तारकब्रह्मचेत्युक्तेनेनदीक्षाप्रशस्यते
यदापुरुषस्यक्षाधेदीक्षाविधिमजानतः वैदिकस्याथभावेननाममंत्रेभवेद्ध्रुवं अष्टम्यांचैत्रमासस्यशुक्लपक्षेजितेंद्रियः
दंतधावनपूर्वंतुस्नात्वाचायथाविधिः नद्यांतडागेकूपेवाद्देवस्रवणिकि ततःसंध्यादिकाःकुर्यात्संस्मरन्राघवं

वे.

५७

57

हृदि गृहमागत्य विप्रेंद्र कुर्य्याद्दीपासनादिकं दांतं कुटुंबिनं विप्रं वेदशास्त्ररतं सदा श्रीरामपूजानिरतं स्वशीलं दंभवर्जितं विधिज्ञं
राममंत्रेण राममंत्रैकसाधनं आहूय भक्त्या संपूज्य वरणं याचयेत्प्रार्थयन्निति श्रीरामप्रतिमादाने करिष्येहं द्विजोत्तम तत्रा
चार्य्यो भव प्रीतः श्रीरामोस्ति ममेवमे इत्युक्तोन्येन तं विप्रं स्नापयित्वा ततः स्वयं तैलं नाभ्यक्तस्तु स्नायाच्चिंतयन् राघवं हृ
दि मे तावद्वरयच श्वेतगंधमाल्यानि धारयेत् अर्चितो भूषितस्तेन वस्त्रैस्तत मध्याह्निकक्रियाः आचार्यं भोजयेत्सम्यगास्तिका
न्नैः सविस्तरं भुंजीत स्वयमप्येवं हृदि राममनुस्मरन् नवम्यां मंगलस्नानेन एकभक्तेन राघव इक्ष्वाकुवंशतिलक प्रीतो भव
भवप्रिय इति निवेदनमंत्रः एकभक्तं ब्रवीत्ससहाचार्यो जितेंद्रियः श्रावयन् रामकथां दिव्यां महःशेषं नयेत्ततः सायं संध्या
दिकाः कुर्य्यात्क्रियाः राममनुस्मरन् आचार्यसहितो रात्रावधःशायी जितेंद्रियः वसेत्स्वयं तथैकांते श्रीरामार्पितमा
नसः आचार्यकरणाशक्तः स्वयं भक्त्या समेत्सदा इत्यष्टमीकृत्यं ततः प्रातः समुत्थाय स्नात्वा संध्यां विधाय च प्रातः सर्वा
णि कर्माणि शीघ्रमेव समापयेत् उपोष्य नवमीत्वद्य यामेष्वष्टसु राघव तेन प्रीतो भव त्वं भो संसारात्राहि मोहहे इत्यु पवा=
सनिवेदनमंत्रः ततः स्वस्थमना भूत्वा विद्वद्भिः सहितो नच स्वगृहे चोत्तरे भागे यागार्थं मंडपमारभेत् चतुर्द्वारं पताकाढ्यं
स्ववितानं सतोरणं मनोरमं महोत्सवं पुष्पाद्यैः समलंकृतं शंखचक्रगदापद्मैः प्राकारैः समलंकृतं गरुत्मद्धाङ्गवा
णैश्च दर्पणैः समलंकृतं [ग]दावज्राङ्कदेश्च द्यांश्चमे समलंकृतं पद्मरागैकनीलैश्च कौबेरैः समलंकृतं मध्यहस्तचत
गै=

५७

क्षालितं वेदिकायुक्तमायतनं प्रविशेन्नृत्यगीतैश्च वाद्यैश्चापि समायुतं पुण्याहं वाचयेत्तत्र विप्रेन्द्रैः प्रीतमानसैः ततः संकल्पयेद्दे
वं राममेवमनुस्मरेत् अस्यां रामनवम्यां च रामाराधनतत्परः उपोष्याष्टसु यामेषु पूजयित्वा यथाविधिः इमां स्वर्णमयीं राम
प्रतिमां संप्रयत्नतः श्रीरामप्रीतिदास्ये रामभक्ताय धीमते प्रीतो रामो हरत्वाशु पापानि सुबहूनि मे अनेकजन्मसंसिद्धान्यभ्य
स्तानि महान्ति च इति त्रिः संकल्प्य शक्ताशक्तात्यशक्तस्य मूर्तिनिर्माणमुच्यते ततः स्वर्णमयीं रामप्रतिमां पलमानतः
निर्मितां द्विभुजां दिव्यां वामाङ्कस्थितजानकीं बिभ्रतीं दक्षिणकरे ज्ञानमुद्रां महाशुभे वामेनाधःकरेणाराद्देवीमा
लिङ्ग्य संस्थितां सिंहासने राजते च पलद्वयविनिर्मिते अशक्तो यो महाभाग तस्य वित्तानुसारतः पलेनार्धेन तद्धा
र्धेन वा मुने ततोऽप्यशक्तो रौप्येण कारयेद्रघुनन्दनं लोहेन निर्मितां वापि शिलायां दारुणापि वा यद्वालेख्ये विलिख्य वा
वामाङ्करेकगतं हरिम् कोमलाङ्गं विशालाक्षमिन्द्रनीलसमप्रभं दक्षिणाङ्गे दशरथिं पुत्रान्वेषणतत्परं पृष्ठतो ल
क्ष्मणं देवं सच्छत्रं कनकप्रभं पार्श्वे भरतशत्रुघ्नौ तालवृन्तकरावुभौ अग्रे व्यग्रं हनूमन्तं रामानुग्रहकाङ्क्षिणं वित्तशाठ्य
मकुर्वाणो मूर्तिं कुर्यात्प्रयत्नतः विभवे सति को मोहात्कुर्याद्विधिविस्तरं न तत्फलमवाप्नोति देवद्रोहः स उच्य
ते इति मूर्तिलक्षणं आसनोपरि संवेश्य पञ्चपल्लवजालं विधाय च शंखं प्रक्षालयेद्दिव्यं गन्धपुष्पाक्षतादिभिः कलशं वाम
भागस्थं पूजाद्रव्याणि चादरात् पात्रं च योजयेद्भक्त्या चात्मानं मन्त्रमुच्चरन् इति शंखप्रतिष्ठा सर्वतोभद्रमालिख्य वे

वे. दिकोपरिसंदरं मध्येनीयोदकैः पूर्णकुंभरत्नोदरंशुभं हृतपल्लवपुष्पैश्चयुक्तं संस्थाप्यचार्चितं सौवर्णराजतेनाथवाथेष
५८ ह्मणामालिखेत् मूलमंत्रे बिल्वपीठेवाकलशोपरिसंस्थिते स्थाप्योपरिवस्त्रयुग्ममच्छिन्नंसदशंततः दिव्यसिंहास
नेतत्रस्थापयित्वार्चयेत्सुधीः ॐनमोभगवतेविश्वेसर्वभूतात्मनेवासुदेवायसर्वात्मसंयोगयोगपीठात्मनेनमः
58 इतिमंत्रेणकुर्यात्पुष्पांजलिंपुनः इतिपीठार्चा अर्घ्यपाद्यादिकंदद्यात्स्नानंपंचामृतेनच लेप्यादौनोभिषेकःस्याद
द्याद्वस्त्रोपवीतकं इतिस्नानं ततःसंस्थाप्यपीठेतत्पूजांकुर्याद्यथाविधि आवाहनंस्थापनंचसन्निधापनमेवच सन्नि
रोधनमेवस्यादवकुंठनमंजसा ततन्मुद्राभिरेवःस्याद्देवंसंप्रार्थ्यभक्तितः नानारत्नविचित्राणिवस्त्राद्याभरणानि
च हिमांबुरुहरुचिरचनमाल्यसमन्विते गंधंदद्यात्प्रयत्नेनसागुरुंचसकुंकुमं कल्हारकेतकीजातीपुंनागाद्यैः
प्रपूजयेत् चंदकैःशतपत्रैश्चसुगंधैःसुमनोहरैः हृतपल्लवपुष्पैश्चदूर्वाभिस्तुलसीदलैः कोमलैर्बिल्वपत्रैश्च।
अशोककुसुमैः तथा रामस्यजननीचासि रामात्मकमिदंजगत् अनन्तांपूजयिष्यामिलोकमातर्नमोस्तुते ३
तिकौशल्यार्चा नमोदशरथायेतिपूजयेत्पितरंततः इतिपितृपूजनं ततोन्यत्राप्यदेवस्यपरिवारान्समर्चयेत् पूर्वेषु
कोणेषु हृदयादीतिषडंगमात् इतिप्रथमावरणं हनूमंतंमसुग्रीवंभरतंसविभीषणं लक्ष्मणंगदंशत्रुघ्नंजांबवंतंद
लादिषु इतिद्वितीयं धृतिंजयंतंविजयंसुराष्ट्रंराष्ट्रवर्धनं अकोपंधर्मपालाख्यंसुमंतंदलमध्यतः इतितृतीयं द

लाग्नेलोकपालांश्च चतुर्थे तदस्त्राणितदथ ततः नमस्कारचतुर्थ्यंताभ्यां तामममंत्रैः प्रपूजयेत् पंचमे यंत्रांचवावयन्स्वपंदीपंचा
स्मैसमर्पयेत् भक्ष्यभोज्यादिनाभक्त्यानैवेद्यंविधिनार्पयेत् आचामंचसतोहूलंमहानीराजनंततः नमस्कार्य्यानंतस्तो
त्रैस्तत्ताबाप्रजपन्मनं श्रावयन्नजयंतीमाहात्म्यंरामकथांतथा रामभक्तैः समंयामंनयेद्रामममनुस्मरन् इतिप्रथम
यामकृत्यं शंखपात्रामनाचांवकुर्य्याध्यामेत्वतंद्रितः यामेद्वितीयेसंप्राप्ते मध्याह्ने जन्मभावयेत् उच्चस्थेग्रहपंचकेस्त
रगुरौसेंदौनवम्यांतिथौलग्नेकर्कटकेपुनर्वसुयुतेमेषगतेपूषणि निर्दग्ध्यंनिखिलाः पलाशसमिधोमध्योदयोधो
दयोध्यारणेराविर्भूतमभूतपूर्वविभवयत्किंचिदेकंमहः मत्वेवंयादयेद्धायानंर्च्चदयाजगत्यंतेः फलंपुष्पांद्रसंगृह्णंरि
हीत्वाशंखमजत्तमं अशोकभूतकुसंभैर्युक्तंचतुलसीदलैः दशाननवधार्थायधर्मसंस्थापनायच दानवानांवि
नाशायदैत्यानांनिधानायचपरित्राणायसाधूनांजातोरामःस्वयंहरिः गृहाणार्घ्यंमयादत्तंभ्रातृभिःसहितोनघ इत्य
र्घमंत्रः पुनः पुष्पांजलिंदत्वायामयामेष्टतंद्रितः पूजयेद्विधिवद्भक्त्यादिवारात्रेनयेद्बुधः ततः प्रातसमुत्थायस्नानसं
ध्यादिकाः क्रियाः समाप्यविधिवद्रामंपूजयेत्पूर्ववन्मुने ततोहोमंप्रकुर्वीतमूलमंत्रेणमंत्रवित् पूर्वोक्तपद्मकुंडे
वास्थंडिलेवायथाविधि लौकिकाग्नौविधानेनशतमष्टोत्तरंततः साज्यपतयायसेनैवस्मरन्राममनन्यधीः त
तोभक्त्यासुसंतोष्यआचार्यंपूजयेन्मुने कुंडलाभ्यांसुरत्नाभ्यांअंगुलीयैरनेकधा गंधपुष्पाक्षतैर्वस्त्रैर्विचित्रैः सम

वं.

नोहरैः ततोरामंस्मरन्द्याद्देवंमंत्रमुदीरयन् इमांस्वर्णमयींरामप्रतिमांसमलंकृतां चित्रवस्त्रयुगछन्नांरामोहंराघवा
यते श्रीरामप्रीतयेदास्येत्वहंभवन्तराघव इतिप्रतिमादानमंत्रः इतिदत्वाविधानेनदद्याद्दक्षिणांभुवं अन्येभ्यश्च
५९ धान्यादियंगोहिरण्यादिशक्तितः दद्याद्दासीयुगंयान्यद्यथादिभवमादितः ब्राह्मणैः सहभुंजीततेभ्योदद्याच्च दक्षिणां
तत्प्रसादस्वीकारः कर्तव्यस्त्वारणंमया तेनव्रतेनप्रीतस्त्वंस्वस्मिन्भक्तिंप्रयच्छमे इतिपारणसंकल्पः कृत्वैवंब्रह्म
59 ह हत्यादिपापेभ्योमुच्यतेध्रुवं तुलापुरुषदानादिफलंप्राप्नोतिमानवः अनेकजन्मसंसिद्धपापेभ्योमुच्यतेध्रुवं बहु
हनाकिमिहोक्तेनमुक्तिस्तस्यकरेस्थिता कुरुक्षेत्रेमहापुण्ये सूर्यपर्वण्यनेकशः तुलापुरुषदानाद्यैः कृतैर्यल्लभ्यते
फलं तत्फलंलभतेमर्त्योदानेनानेनसुव्रत इतिदशमीकृत्यं अकिंचिनोपिनियतउपोष्यनवमीदिने कृत्वाराजा
गदणंभक्त्यारामभक्तैःसमन्वितं स्मरन्रामंधियाभक्त्याप्रजयेद्विधिवत्सुते जपन्राममन्त्रंमायारामानंगमसम
न्वितं एकान्तरंवाविधिवत्सर्वन्यासंकृत्वोत्थितः प्रातः संध्यांचविधिवद्दिवासंध्यादिकाः क्रियाः गोभूतिलहिरण्याभिर्दद्याद्वि
त्तानुसारतः श्रीरामचंद्रभक्तेभ्योविहङ्गः श्रद्धयान्वितः पारणंचप्रकुर्वीतब्राह्मणैः सहशक्तितः एवंयः कुरुतेभक्त्यासर्व
पापैः प्रमुच्यते गंगायांप्रतिपेत्स्वैर्यालेवामूर्तिश्रहेत्यसेत इतिकिंचनव्रतं शक्तस्ययदुक्तंप्रोक्तमशक्तोप्युपवनंचतन्न
तदपिस्यात्यथाशक्त्यामार्गेत्वसकलंसदा एकामपिनरोभक्त्याश्रीरामनवमीदिने उपोष्यकृत्वाकृत्यः स्यात्सर्वपापैःप्र ५९

मुच्यते अपिशक्राद्शक्तस्य स्पर्शैर्दानात्तत्र सूचितं इति किंचतद्व्रतं यापनं च सूचितं वर्षेवर्षे समर्थस्य व्रतेनैव प्रपूर्णता न तस्योद्यापनं
किंचिद्दानादन्यद्दियते सर्वव्रतस्य स्पर्शस्यार्थे सदा रामव्रतं चरेत् नान्येन तस्माद्विवक्षितं नैनेदास्य पूर्णता इति समर्थोद्यापन
तयः इत्यगस्त्यसंहितायां रामजन्मनवमीजयंतीव्रतं समाप्तम् द्वादश्यां चैत्रमासस्य शुक्लायां दंतधावनं बौधायनादिभिः प्रो
क्तः कर्तव्यः प्रतिवत्सरं तत्र स्यात्तत्प्रतिथिषु वस्त्रादेर्दमनार्पणं वह्निर्विधिर्विर्चोगिरिजागणेशाः फणी विशाखो दिनहृत्स्म
रेशाः दुर्गान्तकौ विश्वहरिस्मरश्च सर्वः शशी चेति तिथीश पूज्याः क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो नमे विघ्नोभ
वेदत्र कृतार्थद्यां मयि सर्वथा सर्वदा विभो मम त्वं परमा गतिः उपवासेन तत्वाद्देवतोषयामि जगत्पते कामक्रोधादयो
ये तेन मे स्युर्व्रतघातकाः अद्यप्रभृति देवेश यावद्वैशेषिकं दिनं तावद्रक्षा त्वया कार्या सर्वस्यास्य जगत्पते एवं विज्ञाप्य देवे
शं गुरुपादौ प्रणम्य च प्रातः स्नात्वा समभ्यर्च्य देवेशं विधिवत्ततः गच्छेद्दमनकारामं मेकादश्यां सुशोभितं क्रमेणाद्यायत
नैव पूजयेच्चंदनादिभिस्तेषामिरामपूजार्थं इति संप्रार्थ्य तं तमेत् उत्पाद्य पंचगव्येन प्रोत्थय प्रतात्यवारिणा अशोकमूलेन
थादौ स्थंडिले पूजयेत्क्रमात् अशोकं च तथा कालं वसंतं काममेव च ॐ अशोकायतनमस्तुभ्यं कामस्त्रीशोकनाशन शो
कार्तिहर मे नित्यमानंदं जनयस्व मे अनेन पूजयेत्सुष्ठ्व अशोकं शोकनाशनं ॐ तद्युगादिकालपर्यंतः कालरूपो महाब
लः कलते चैवयः सर्वं तस्मै कालात्मने नमः अनेन पूजयेत्कालं मदयं कलनात्मकं २ वसंतायतनमस्तुभ्यं हृदयग्लस

चं. लतांप्रिय सहस्रसम्वसंवासकामरूपनमोस्तुते वसंतपुष्पैरमनामनन्तकामरूपिणं ३ ॐकामभस्मसमुद्भूतरतिवाष्पपरिप्लुत
६० ऋषिगंधर्वदेवादिविमोहकनमोस्तुते मंत्रस्सदमनंपूजयेत्मनुनाऽमुना ४ ॐनमोस्तुपंचबाणायजगदाह्लादकारि
णे मन्मथायजगन्नेत्रेरतिप्रीतिप्रियायच दमनंचोपनिहितंमंत्रेणानेनमन्मथं दमनंतत्पृथक्कृत्वाभागेनैकेनमन्मथं
60 पूजयेद्रक्तमार्गेणपरिवारसमन्वितं कामायतमइत्येषमंत्रस्तुप्रणवादिकः मंत्रेणानेनदमनंपूजयेद्गंधपुष्पकैः धौतेन
वाससाच्छाद्यनिधायपद्मदलेनवै चंदनागुरुकर्पूरकस्तूर्यादिसुवासितैः स्वगृहमानयेत् इतिगृहानयनं वक्ष्यमाणप्रकारेणाद
मनंवाधिवासयेत् निशायांरामचंद्राग्रेकुर्यादष्टदलंशुभं व्यक्तंसितासितारक्तपीतवर्णैःप्रपूरितं चतुष्कोणंबहिःकृत्वा
पीतवर्णेनपूरयेत् तद्बाह्येश्वेतपीताभ्यांवर्तुलमंडलत्रयं तद्बाह्येप्राच्यतःकोणंरक्तवर्णेनपूरितं सार्वकामिकमेतद्धिसर्व
तोभद्रमंडलेन कुंभंपूर्णंपाद्यतोयस्यहेमरत्नयुतंशुभं संस्थाप्यतस्मिन्रामाग्रेदमनंतत्रपूजयेत् वितानंपंचवर्णाढ्यंध्वजमा
लांसिच निर्मायमहतींपूजांकुर्याज्जनार्दनाधिवासनं पूजार्थंदेवदेवस्यविष्णोर्लक्ष्मीपतेःप्रभोः दमनत्वमिहागच्छसान्निध्यं
कुरुतेनमः इत्यावाहनमंत्रः ॐक्लींकामदेवायनमः ॐह्रींरत्यैनमोस्त्विति दिव्यस्मरशरीरायानंगायचनमोनमः
ॐमन्मथायचरामायक्लींवसंतसखायच स्मरायचेक्षुचापायपुष्पबाणायेतिपूजयेत् ॐतत्पुरुषायविद्महेकामदेवायधी
महि तन्नोऽनंगःप्रचोदयात् इतिमन्मथगायत्र्यासमंत्राष्टोत्तरशतं धूपदीपैश्चनैवेद्यैरुपचारैःप्रपूजयेत् हार्दैमनुना

पुष्पांजलिं दत्वाभिवंदयेत् नमोस्तु पुष्पबाणाय जगदाह्लादकारिणे मन्मथाय जगन्नेत्रे रतिप्रियतमोस्तु ते इति आमंत्रितोसि
देवेश पुराणपुरुषोत्तम प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव क्षीरोदधिमहानागशय्यावस्थितविग्रह प्रातस्त्वां पूजयि
ष्यामि सन्निधौ भव तेनमः निवेदयाम्यहं तुभ्यं प्रातर्दमनकं शुभं सर्वथा सर्वदा विष्णो नमस्तेस्तु प्रसीद मे इत्यामंत्र्य
देवेशं दत्वा पुष्पांजलिं पुनः पूजितं तद्दमनकं कुंभस्योपरि संस्थितं ग्रहेण सर्वतो रक्तेन कवचेनावगुंठयेत् रक्षेद्राचक्रमं
त्रेण तद्रक्षेन्मंत्रनाथवा ब्राह्मणेभ्यो नमस्कृत्य गुरुपादौ प्रणम्य च गीतमंगलनिर्घोषैः कुर्याज्जागरणं ततः इति दमनाधि
वासनं प्रातर्नत्वाथ देवेशं कुर्यात्स्नानं यथाविधि नित्यपूजां पृथक्कृत्वा कुर्यान्नैमित्तिकीं ततः दमनं हर्षयप्रोक्तं गंधाद्य
तसमन्वितं जयमंगलनिर्घोषैर्देवदेवे समर्पयेत् ॐ देवदेव जगन्नाथ वांछितार्थप्रदायक हृदिस्थान्पूरयेः कामान्ममका
मेश्वरीप्रिय इदं दमनकं देव गृहाण मदनुग्रहात् इमां सांवत्सरीं पूजां भगवन्परिपूरय मूलेन संपुटितेनैव दमनीरोपणे
मंत्रः एवं समर्प्य देवाय प्रार्थयेद्विष्णुमव्ययं मणिविद्रुममालाभिर्मंदारकुसुमादिभिः इयं सांवत्सरी पूजा तवास्तु गरुडध्वज
वनमालां यथा देव कौस्तुभं सततं हृदि तद्वद्दामनिकीं मालां पूजां च हृदये वह ज्ञानतोऽज्ञानतो वापि न कृतं यन्मयार्चनं तत्सर्वं
पूर्णतां यातु त्वत्प्रसादाद्रमापते जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन नमस्तेस्तु हृषीकेश महापुरुष पूर्वज मंत्रहीनं क्रि
याहीनं भक्तिहीनं जनार्दन यत्पूजितं मया देव परिपूर्णं तदस्तु मे एवं संप्रार्थ्य देवेशं निपतेद्दंडवद्भुवि अथ संपूजयेद्भक्त्या

त=२

चे. गृहे वस्त्रादिकं चान्यैः स्वयं धन्यामभ्यर्च्य वैष्णवान् विप्रान् संभोज्य पारयेत् स्यादश्वमेधजं पुण्यमित्याह भगवाञ्छिवः इति दमनारोपणं
पारणाहे न लभ्येद् द्वादशी घटिकापि चेत् तदा त्रयोदशी ग्राह्या पवित्रदमनार्पणे माधवे दमनारोपः स्यान्मधौ विघ्नतो यदि
६१ वैशाख्यां श्रावणे भाद्रे वा कर्त्तव्यं वा तदर्पणं इति चैत्रकृत्यं वैशाखे पौर्णमास्यां तु जलस्थं जगदीश्वरं शुक्लस्यैकादशी या
वत्पूजयेत्सप्तऋषिभिः तथा च गारुडे निक्षिप्य जलपात्रेत्र मासे माधवसंज्ञिते माधवं येर्चयिष्यन्ति देवतास्तेन राभुवि स्वर्ग
पात्रे तथा रौप्यताम्रे वा मृण्मयेपि वा तोयस्थं येर्चयेद्देवं शालग्रामसमुद्भवं प्रतिमां वा महाभाग तस्य पुण्यमनन्तकं त
स्मात्पूज्यो हि महाभाग तोयस्थं पूजयेद्धरिं वीततापो नरस्तिष्ठेद्यावदाभूतसंप्लवमिति ज्ञेयः कालविकल्पोयं उत्सवस्तावतस्य
नः गंधोदकयुते पात्रे नित्यपूजां समाप्य च प्रतिवासदिनं पूजां समाप्य च प्रतिवासदिने रात्रौ देवं नीत्वा निजाश्रमे पंचोप
चारैः संपूज्य तीर्थप्रायपविसर्जयेत् आत्मानं गृहदारादीन् तेन तीर्थेन पावयेत् द्वादश्यां तु जले रात्रौ जलस्थं जलशायिनमि
ति इति वैशाखज्येष्ठयोः कृत्यं आषाढशुक्लद्वादश्यां तु रात्रौ शयनोत्सवः कार्योन्यथा तन्नाहिर्हिर्भवत्यारणा वाक्यतः भविष्ये
मिथुनस्थे सहस्रांशौ स्वापयेन्मधुसूदनं तुलाराशिगते तस्मिन्पुनरुत्थापयेत्प्रभुमिति गारुडे मिथुनस्थे सहस्रांशौ यो न
स्वापयति यो हरिं वैष्णवैः सह संभूय स नाहिहिस्तदा भवेदिति भविष्योक्तप्रकारस्तु शाखेत शयनोत्सवे पारणाहे सर्वे सो
घंटादीन्वादयन्बहु विधाय महतीं पूजां विसृज्याभ्यर्च्य वैष्णवान् शौनकोक्तप्रकारेण तन्नपूजां कथारणं कर्त्तव्यं वैष्णवैः

बि=

६१

61

सर्वैः संप्रदायानुरोधतः अस्मत्तत्त्वतदामोऽस्तु ते स्तुतामद्दृहन्नस्तस्मामाशात तयोः पवित्रं वितनं दिव्यरूपं देशोचं तेनाश्र
यंतं तं तवोऽस्थिरवन् इति ऋग्वेदे महोवाच याज्ञवल्क्यस्तस्मात्सुमानात्महिताय प्रमत्तगाहरिं भजेत्सुश्लोकमौलेर्वमा।
णप्रिनामसंदधत इति शातपथी श्रुतिः प्रतिदिनमाश्रुत्वचके सुत तेन जन्मांभोधीतं नेवेचर्षणंद्राः मूलेवा स्वादं दधत्यष्टरा
णलिङ्गान्यङ्गुत्नमायथान्यर्पयंत इति सामवेदे अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा ब्राह्मणस्य तथैवेदं तन्नमच।
क्रादियारणमिति यामस्मृतिः श्रुतिस्मृतिशतैः कृत्स्नमुपकारः प्रतन्यते बह्वृचपरिशिष्टे प्रोक्तोऽयः शौनकादि
भिः षोडशोपचारैर्भगवंतमभ्यर्च्य स्तोत्रैरेपरमेन्स्यामत् शन्नोमित्रः शंवरुण इत्येताभ्यां चक्रं शंखं वाभ्यर्च्य द्दा
दशावंतद्दिनज्ज्वरायाग्नेर्मकृते प्रथमस्य प्रचेतस इत्येताभ्यामभ्यावादध्यात् वैश्वानरस्य सुमतौ स्यामेत्यनयाग्निं
पवित्रैरत् पुरुषसूक्तेन षोडशाहुतीर्हुत्वा भगवंतं पुरुषसूक्तेनोपस्तुत्य योब्रह्माणमिति प्रकेनोदडवन्निपतेत्
अथ सुदर्शन महाज्वाल सूर्यकोटिसमप्रभ अज्ञानांधस्य मे नित्यं विष्णोमार्गं प्रदर्शय इतिमादाय ओं सुदर्शना
थ विद्महे महाज्वालाय धीमहि तन्नश्चक्रं प्रचोदयात् इति चक्राथातं पंचजन्य निजध्वांत ध्वंसपातककसंचयं पाहिमां
पापिनं घोरं संसारार्णवपातिनं इत्यादाय पंचजन्याय विद्महे हयवामनाय धीमहि तन्नो शंखः प्रचोदयात् इति
शंखयातमिति यएवं कुरुते विद्वान्ब्राह्मणः श्रोत्रियः शुचिः सर्वपापैः प्रमुच्येत विष्णुलोकं च गच्छति शयन्यांचैव

व॰ वोयन्यांचक्रतीर्थेनतथैवच शंखचक्रौविधानेनवह्निप्ततोभवेन्नरः इतिमुद्राधारणविधिः नीराज्यनरयानेथ्यारोप्यरामंससैवसेवैः
६२ गीतवादित्रघोषेणदेवीनीनाजलाशयं पुष्पांजलिप्रदायाथयानादुत्तारयेत्प्रभुं नीरेंद्विन्यामममाथ्यासहहस्तंदत्तोपवेश
येत् योनोद्विपाणिरावांतःकुर्यात्तंकल्यमाहृतःन्यासंहृत्वाथदेवंचस्वर्णाचर्मान्नवाकृतःतथापुरुषसूक्तेनोन्नरनारा
यणेनच पंचामृतेनसंस्नाप्यपूजाभ्यर्थ्यारहृन्नमंत्रेनोदेवैतिमंत्रेणजलेषुस्थापयेत्प्रभुं शेषपर्यंकवर्येस्मिनफलाम
णिगणामले श्वेतद्वीपांतरेदेवकुरुनिद्रांनमोस्तुते प्रथहृत्वामहापूजांगंधस्रग्धूपदीपकैः ध्वन्नताद्वलनन्यापैरा
धयस्वाघयहेहरेः स्वपितेत्वयिजगन्नाथजगत्सुप्तंभवेदिदं विबुद्धेचविबुद्धेतत्प्रसन्नोमेभवाव्ययः इतिसंप्रार्थ्यतस्याग्रेगृह्णी
यान्नियमानिमान् श्वेतद्वीपभोगिनाथेयोगिनाथेस्थितेन्नापि चातुर्मास्यव्रतेन्नजांदेहिलक्ष्मीपतेमम । लब्धानुज्ञां
शंखहस्तोयथाप्रोषितभर्तृकाचतुरोवार्षिकान्मासाश्चवोत्थापनावधि इमंकरिष्येनिर्विघ्नंकुरुमेच्युत इदंव्रतंमया
देवगृहीतंपुरतस्तवनिर्विघ्नंसिद्धिमायातुप्रसादात्तेरमापते गृहीतेस्मिनव्रतेदेवहीनपूर्वकृतेनविनिर्विघ्नंसिद्धिं पंचत्वंयदिमे
भवेत् तदाभवतुसंपूर्णंप्रसादात्तेरहूद्वह इत्यभ्यर्थ्याथदेवायशंखेनार्घ्यंनिवेदयेत् श्रावणेवर्जयेच्छाकंदधिभाद्रपदेत
था दुग्धमाश्वयुजेमासिकार्तिकेचामिषंत्यजेत् प्राणिगर्हणंचर्मांबुजंवीरंवीचपत्रकं श्मश्रुधारणशिष्टमन्नाद्यंयद्विस्मार
निवेदितं द्रव्यमन्नंमसूरंचमाषंचेत्यपुष्टथामिषं हव्यंतद्देशालभ्यफलमूलादिवर्जयेत् निष्पावीनाजमाषांश्चमसूरं ६२

संधितानिच हंताकंचकलिंगंचसूरणेदेवेनभक्तये। दिनिसम्मते: चतुर्थपीहमासेषुहविष्याशीनपायभाक् हैमांतिकंसि
तास्विन्नंधान्यंमुद्गायवास्तिलाः कलायकंगुनीवारावास्तूकंहिमलोचिका षष्टिकाकालशाकंचमूलकंकेमुकेतरत्
कंदंसैंधवसामुद्रेगव्येचदधिसर्पिषी पयोमसृत्सारंचपनसाम्रहरीतकी पिप्पलीजीरकंचैवनागरंगंचतिंतिडी
कदलीलवलीधात्रीफलान्यगुडमैक्षवं अतैलपक्वंमुनयोहविष्यान्नंप्रचक्षते अन्यान्वपिपुराणेषुउक्तान्यानिव्रतानितु
ततस्त्वाप्रजापालेराजन्याशास्त्रमंगलं शंखतीर्थंचसंप्राप्यगीतनृत्यादिनाहरिं परितोष्याथसंपूज्यवैसम्यवानरया
नकं भगवंतंसमारोप्यगीतवादित्रघोषतः आगत्यमंदिरेहृत्वामहानीराजनंप्रभोः विसृज्यवैसवान्देवमुपवेश्य
सुखंस्वपेत् इत्याषाढेशयनोत्सवः श्रावणस्यसितेपक्षेद्वादश्यांशोभनकादिभिः उक्तःसदाप्रकर्तव्यःपवित्रारोपणोत्सवः
तथाचवह्निचपरिशिष्टे मस्तानः सर्वतीर्थेषुसर्वयज्ञेषुदीक्षितः हरिस्त्वश्रीतिमाप्नोतियःपवित्रंसमाचरेत् विधिनाश्रा
ह्लाहहेनयानकुर्यात्पवित्रकं हरंतिराक्षसास्तस्यवर्षपूजादिकंफलमिति पाद्मे ऊर्जेव्रतमथोदोलाश्रावणेतंतुपू
जनंचैत्रेचदमनारोपमकुर्वाणोव्रजत्यधः इति पवित्रारोपणंविनाश्रावणेनभवेद्यदि कार्त्तिकव्रवधिमुक्तोसौकर्तव्यमि
तिनारदः इतिपवित्रनित्यता प्रयोगसारादुत्पत्तिःपवित्रस्यप्रतन्यते कनीयान्वासुकेनांम्नापवित्रोनामनागराट्
निराहाप्रव्रतोभूत्वावैदिकंशरदंशतं तपस्तेपेसमाश्रित्यदेवदेवंमहेश्वरं प्रसन्नतपसातस्मप्रत्स्नात्सहर्षोनमः

पं. प्रणतार्त्तिहरःशंभुरविराशीद्रुमापतिःप्रसादाभिमुखंदृष्ट्वादेवंसभुजगेश्वरःकंठाभरणतांशम्भुंवव्रेवरमनुत्तमं तथेत्याभाष्यतं
६३ तद्वद्धारयंसत्रिपुरांतकःप्रादात्तस्मैवरंचान्यमन्यविज्ञायात्मयोगिने येनावकृतमन्यंतेयथासंभावितोमया जपहोमादिकंते
षांफलंतवामेतन्निश्चयात् अत्रैवश्रावणेमासितत्तत्रैवापिवैल्लवे तस्मादाराधयंतत्तोनित्यनैमित्तिकोद्यताः वेदिकाः
63 शक्रहोमेनपूजांकुर्वंतितेनच त्वन्माहात्म्यात्वकोणानिवीतेनैवतांत्रिकाः आराध्यारोप्यप्रज्यायेदेवतायैपवित्रकमिति
श्रीपवित्रोत्पत्तिःनानागमोक्तमार्गेणतस्यकर्तव्यतोच्यते हैम्यंरौप्यंताम्र दौमैःसूत्रैःकौशेयपट्टजैःकुशैश्चकार्य्या
व= कर्पासैःब्राह्मणाकर्तितैःशुभैःकन्ययावर्तितैःस्यात्तुप्रक्षाल्यादिभिःकृतैःस्नानात्रिगुणितंसर्वंत्रिगुणीकृत्यशोधये
त् हस्तमंत्रेणपंचगव्येरद्भिःप्रक्षालयेत्ततःमूलेनाष्टोत्तरशतंगायत्र्यारामसंख्यया शर्वोदकेनाभिमंत्र्यापवित्राणिवि
निर्ममेत् दुग्धंदध्याज्यविण्मूत्रैःपंचगव्यक्रमंविदुः आप्यायस्वदधिक्राव्णोतेजोसिशुक्रमस्यथा गायत्र्यातोगंधद्वारांमं
ज्ञाःस्युःपंचगव्यके मधुवातेतिगायत्रीक्रमःपंचामृतेतथा इतिसूत्रशुद्धिः ततोत्तमपवित्रेतुअष्टोत्तरसहस्रतंतुभिःस
तन्यासहितद्वाभ्यांशताभ्यांमध्यमंस्मृतं साशीतिनाशतेनैवकनिष्ठंतत्समाचरेत् अष्टोत्तरंतदर्धार्धैनवसूत्रीक्रमेण
वा जान्वूरुनाभिपर्यंतमुत्तमादित्रयंभवेत् अष्टोत्तरसहस्रेणवनमालांसमाचरेत् उत्तमस्यपवित्रस्यद्वैगुण्येनापिभावये
त् आरभ्यमुकुटंयावत्सूत्रेविरचिताशुभा आपादलंबिनीमालावनमालाप्रकीर्तिता यजमानपवित्रंवाधिवासनय

कुत्रचित् विघ्नो भवतु तद्दानेन कर्तुः स्यादशुभं फलं पवित्रं परया भक्त्या
तस्मात्कुर्वीत = ४

वित्रकं कनिष्ठेन समं कार्यं मध्यमेव समं गुरोः स्वेनैः पवित्रं कुर्वीत मध्यमेन समं शुभं साधारणपवित्राणि त्रिभिः सूत्रैः समा
चरेत् उत्तमं तु शतग्रंथिपंचाशद्ग्रंथि मध्यमं कनिष्ठं तु पवित्रं स्यात् षड्विंशद्ग्रंथि शोभनं षड्विंशच्चतुर्विंशद्द्वादशेति च केचन च
तुर्विंशद्द्वादशाष्टाविंत्येके मनयो विदुः ग्रंथ्यष्टपर्वमात्रं तु कुर्याद्ग्रंथिमथोत्तमे तदर्द्धेन तु वर्द्धेन मध्यमे च कनिष्ठिकं
ग्रंथीन् कुर्वीत सर्वत्र सहस्रान्तमनोहरान् नैव विषमसंख्याकान् ग्रंथीन् कुर्वीत शोभनं कुंकुमे रोचनं चैव कर्पूरेण विमि
श्रितं ततोभिमंत्रणं कुर्यात् इदं विष्णुश्च मंत्रतः द्वादशाक्षरमंत्रेण वा सर्वसाधारणस्मृतः त्रिभिरुत्तमसूत्रैः स्यात् देवाधिवा
सके हरिर्मध्यमेभिमंत्रः स्यात् कनिष्ठे तु सदा स्मृतः इति पवित्रलक्षणं ततस्तानि पवित्राणि वेणुवेपटले शुभे संस्थाप्य
शुचिवस्त्रेण विधाय प्रतोत्पलेन अथ तानि समितानि वेष्टनीकुर्यात्तत्र विशताङ्कुशैः मंत्रयेन्मूलमंत्रेण पंचगव्येन शोधयेत्
तानि कृत्वा तेषां नामानि संस्थान्समाचरेत् ततस्तु सर्वतोरक्षां कृत्वाग्निहोमं समाचरेत् स्वयं तु भगवन्मूर्त्तीं महतीं च समाच
रेत् महास्नानं प्रकुर्वीत उपचारैस्तथैव च देवस्य सर्वतस्थाप्यं दंतकाष्ठं जलं कुशाः मृत्तिकां च हरिद्रां च कुंकुमं गोरोचनादि
च पादुकोपानहौ छत्रं चामरं व्यजनं तथा व्रीह्यादीनि च धान्यानि पुरतः स्थापयेत्तथा दंडवस्त्राणि पात्रे च स्नानोत्तरे नानाविधै
रपि वैदिकैश्च जपैर्देवं यथावत्प्रतिरोपयेत् क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो मयैतत्क्रियते देव तत्र तत्र पवित्र
कं नमे विघ्नो भवेदत्र कुरु नाथ दयां मयि सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः उपवासेन देवेश तोषयामि जगत्पते काम

चं.

६४

64

कोधादयोप्येतेनमेसर्वब्रह्मयात्मकाः ब्रह्मप्रभृतिदेवेशायावद्देशेषिकंदिने तावद्ध्यानतयाकार्यासर्वस्यासनमोस्त्वेत एवंवि।
त्वाप्यदेवंसांगरूपादीप्रणाम्यच कुर्वीतवैस्नवैः साईयविज्ञेयगंहविः ओंमेयुगंपाद्वनाख्ये सर्वतोभद्रकेशुभे स्थाप
येत्पुरतोविस्तोत्रमन्त्रसूत्राणिप्रजयेत ओंसर्ववित्सर्वस्ययागस्यपवित्रीकरणायभोः विस्नलोकात्पवित्राय आगच्छेह्नत।
मोस्त्वेत ब्रह्मेतेनवाह्ययेत्सूत्रंमूलमन्त्रयेतेनच उन्नमादित्रयेविज्ञानसमेरेदेवत्रयंतथा गणान्वित्रयेचेवध्यायेल्लोकत्रयं
तथा प्रकृतिवनस्पर्वायांमालायांनिविलात्मिको ध्रुलोकंमोक्षदेसूत्रेध्यायेतत्भावशालिनि ओंसर्वाभरणविज्ञोगसर्व
देवतानमस्कृत लावण्यरूपविश्वात्मनजेष्ठसूत्रंसमाश्रयं ओंसर्वलक्ष्मीकरश्रीशसर्वज्ञानसमात्मक सर्वाधारस्थ
राद्रूपसर्वकर्त्रीप्रजापते सर्वगात्मेशासूत्रेस्मिन्सान्निध्यंकुरुतेनमः सर्वरत्नोज्वलाकारब्रह्माण्डब्रह्मरोचिषा सकृदोत्र
मसर्वांगशिरःसूत्रेस्मिंहिभो प्रकृतेजगतःकत्रिंसर्वालावण्यदायिनि श्रीसूत्रेसर्वकल्याणिसान्निध्यंकुरुतेनमः
उन्नमादीनिसूत्राणिक्रमादालभ्यपाणिना श्रुतिभिर्मन्त्रयेद्देतैःप्रजयेन्मूलमन्त्रतः ब्रह्माविस्नुर्महादेवात्रिसूत्रीदेवता
स्मृताः ओंकारमामवक्षीवब्रह्मानागपशीरविः शिवश्चविश्वेदेवाश्चनवसूत्राधिदेवताः क्रियाचपौरुषीवीराविज्ञ
येषापराजिता मनोन्मयीजयाभद्रामुक्तिस्त्रिसूत्रेशदेवताः ध्यानावासामृतीकृत्यगंधपुष्पाक्षतैः धूपदीपान्नना
ह्वैलेःपवित्रंविनियायजेत ब्रह्मदेवकरेविहानपदसूत्रमुसङ्गं वितस्तिमानकेदोरंवध्नीयात्मंगलात्मकं ओंसंवत्सर ६४

कृतं वा यः संपूर्णफलदो पियत् पवित्रारोपणायैतत्कुरु कं यत्नेन नमः मूलसंपुटितादस्माद्धन्योपवित्रकं नीराजयेत्ततो देवं
मंगलाद्यघोषपूर्वकं नैवेद्यं विविधं दद्यात्ताम्बूलमनुलेपनं उपनिवेद्य ततो देवं जितमित्यादिभिस्तवैः मंत्रेणाथ सुरेशातं दे
वं देवं निमंत्रयेत् आमंत्रितोसि देवेश पुराणपुरुषोत्तम प्रातस्त्वां पूजयिष्यामि सान्निध्यं कुरु केशव ॐ क्षीरोदधिमहा
नागशय्यावस्थितविग्रह प्रातस्त्वां पूजयिष्यामि सन्निधौ भव ते नमः निवेदयाम्यहं तुभ्यं प्रातरेतत्पवित्रकं सर्वथा सर्व
दा विष्णो नमस्ते तु प्रसीद मे निपत्य दंडवद्भूमौ दत्त्वा पुष्पांजलिं पुनः पूजितान्यथ सूत्राणि कुंभं तत्र पुरःस्थितं श्रवेणास
वं तो रत्नकवचेनावगुंठयेत् रक्षाचक्रमंत्रेणान्तं हरेर्मंत्रेणाथवा ब्राह्मणेभ्यो नमस्कृत्य गुरुपादौ प्रणम्य च गीतमंगल
निर्घोषैः कुर्याज्जागरणं ततः अधिवासविधिः प्रोक्तः कथितो नारदाद्विधिः इति पवित्राधिवासनं ततः प्रातः समुत्थाय पूज्या
तो देवं यथोदितं नित्यपूजां ततः कृत्वा पवित्रारोपणं तथैव च नीराजयेच्छुभैः दीपैर्मंगलाद्यघोषपूर्वकं स्तवनाच विविधैस्तोत्रैः।
नत्वा देवं सुरार्चितं ततो मंगलनिर्घोषैः शंखतूर्यादिभिः स्तवैः गंधपुष्पादिनाप्युक्तं दद्याद्देवाय सूत्रकं ॐ राम राम नमस्तुभ्यं
गृहाणेदं पवित्रकं पवित्रीकरणार्थाय वर्षपूजाफलप्रदं पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतं शुद्धो भवाम्यहं देव त्व
त्प्रसादात्सुरेश्वर मूलसंपुटितो ह्येष पवित्रारोपणे मनुः संपाद्याहं त्रिदेवेभ्यस्ततो दद्यात्स्वनामभिः नैवेद्यं तु महाप्र
वं ततो दद्याच्च भक्तितः नीराजयेत्ततो देवं रामकांतं समंगले संवीज्य चामरैः प्रणिपत्य दर्पणं दर्शयेत्ततः विवियातिव

च०
पुष्पाणि दत्वा तु पुष्पांजलिं तथा प्रार्थयेद्देवदेवेशं मंत्रैरेभिर्यथाविधि मणिविद्रुममालाभिर्मंदारकुसुमादिभिः इयं सांव
त्सरी पूजा तवास्तु गरुडध्वज वनमाला यथा देव कौस्तुभं सततं हृदि तद्वत्पवित्रतंतूंश्च पूजां च हृदये वह जानताजानता वा
६५ पि न कृतं यन्न वार्चनं केनचिद्विघ्नदोषेण परिपूर्णं तदस्तु मे मंत्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन यत्पूजितं मया
देव परिपूर्णं तदस्तु मे अपराधसहस्राणि क्रियंतेहर्निशं मया दासोयमिति मां मत्वा क्षमस्व मधुसूदन नियत्यदे
65 उदकूमो भक्तियुक्तेन चेतसा प्रणमेद्देवदेवेशं रामामिष्टार्थदं बुधः ततः पवित्रं गुरवे दद्याद्यथादिष्टवैकं अर्थेतत्पूज
येद्गुरुमाखणिवस्त्रानुलेपनैः ब्राह्मणांश्च वासोभिर्गंधपुष्पादिनार्चयेत् भक्त्या प्रतोषयेत्तांश्च वस्त्रभोजनकांच
नैः मासं पक्षमहोरात्रं त्रिरात्रं धारयेत्तथा देवं तत्र सदर्भं देशकालविवत्तया अन्यहं स्नानकार्यादि सूत्राणपुत्रा
र्पं कारयेत् अभिषिच्यार्घ्यतोयेन पुनर्देवं निवेशयेत् अथातो देवमभ्यर्च्य विशेषात्पुष्पचंदनैः नैवेद्यं विविधं
दत्वा ततः सूत्रं विसर्जयेत् ॐ सांवत्सरीं शुभां पूजां संपाद्य विधिवन्मया व्रजेदानीं पवित्रत्वं विष्णुलोकं विसर्जितं
यावद्देवपवित्राणि तावत्तिष्ठेत्समाहितः ब्रह्मचारी हविष्याशी देवपूजापरायणः पवित्रारोपणं कालेन करो
ति कदाचन तदा यतं जपेन्मंत्रं स्तोत्रं वापि समाचरेत् इति पवित्रारोपणं इति श्रावणकृत्यं अथ भाद्रपदे शुक्लद्वा
दश्यां पाकर्णिकोत्सवः कर्तव्यो वैष्णवैः सार्इगायन्स्तुत्सववडरेः तथा च भविष्योत्तरे पार्थ भाद्रपदे मासि पक्षादश्यां सि ६५

नेहति कटदानंभवेद्दिव्यंमहापातकनाशनमिति प्रायश्चित्तवरीत्यातुदेवंनीत्वाजलाशयं कटदानोत्सवंकु
र्वैइतिसंकल्प्यपूजयेत् देवदेवंजगन्नाथयोगिगम्यंनिरंजनं कटदानंकरिष्यामिप्राप्तेभाद्रपदेशुभे अनेकक
र्णिकावह्निंदत्वागोप्रकल्पयेत् महापूजांततःकृत्वापूर्ववत्स्वगृहंव्रजेत् इतिकटदानोत्सवः इतिभाद्रपदं
कृत्यं आश्विनस्यसितेपक्षेदशम्यांविजयोत्सवः कर्त्तव्यःसज्जनैःसार्द्धंसर्वत्रविजयार्थिभिः हनूमद्वाक्यमाक।
र्ण्यहृष्टातिजनकात्मजा आनंदपूर्णैःकपिभिर्विज्ञापितमुपस्थितं रथमारोप्यदेवेशंसर्वालंकारभूषितं सौमि
त्रिणायतवीणापाणिंतंकोचवरांतकं स्वलीलयाजगत्त्रातुमाविर्भूतमजंविभुं रथैरश्वैःगजैःपद्भिर्मोमित्री।
सुग्रीवादिभिः युतंराजोपचारैस्तंशमीप्रतिसमापयेत् शमीविसर्जनंतत्र्वैइतिसंकल्प्यपूजयेत् विसुयर्मो
क्रमार्गेणयात्रानिर्विघ्नसिद्धये शमीपुरंसितारामंभक्तानामभयंकरं अर्चयित्वाशमीवृक्षमर्चयेच्चततःप्रमा
न् शमीशमयतीपापंशमीलोहितकंटकी धरित्र्यर्जुनबाणानांरामस्यप्रियवादिनी करिष्यमाणयात्रा
यायथाकालंसुखंमया तत्रनिर्विघ्नकर्त्रीत्वंभवश्रीरामपूजिते गृहीत्वासाक्षतांआर्द्रांचशमीमूलगतांमृदं गी
तवादित्रनिर्घोषैस्ततोदेवंगृहंनयेत् केचिद्देवलत्रभाव्यंकेचिद्राज्यंतवानरैः केचिद्दक्तमुखैर्भाव्यंकोशले
इस्यवहये निर्जितारातमाहेन्याविरोगजगतीतले रामराज्यंरामराज्यंरामराज्यमितिब्रुवन् आनीयस्था

च. पयेत्तस्यां दिव्यसिंहासने विभुं ततो नीराज्य देवेशं प्रणमेद्दण्डवद्भुवि ततोपभक्तवस्त्रादि धारयेत्स्वजनैः सह इति विष्णु
धर्मोक्तमाश्विनकृत्यं प्रारभ्यैकादशीं शुक्लामाश्विनस्य तु जागरं प्रबोध्य देवं कुर्वीत स्कांदवाक्याद्द्विजोत्तमाः जा
६६ गरं कार्त्तिके मासि यः करोत्यरुणोदये दामोदराग्रे गोविंद गोसहस्रफलं लभेत् कार्त्तिके पश्चिमे यामे स्तवं गी
तं करोति यः वसेत्स श्वेतद्वीपे पितृभिः सह नारद। न करोति नरो मूढः कार्त्तिके हरिजागरं सयाति नरकं घोर
66 मिति पाद्मे विधानतः नीराज्य संततो स्नायाद्विधिवत्तर्पयेद्देवः व्रतं चरेत्तथा किंचित्कृत्वोर्जे माहिमानकं प्रव्रजेन
दिपेयस्तु मासं दामोदरप्रियं तिर्य्यग्योनिमवाप्नोतीत्यादि पाद्माभिधानतः अथ कार्त्तिके शुक्लके हरिनातमप्राग
धारणं शायत्सक्तप्रकारेण स्वच्छमारोप्य माधवं धौतांघ्रिपाणिः कुर्वीत संकल्पं वैष्णवैः सह पञ्चगुणविशिष्टायां।
बोधिव्यामिंदिरापते कुर्वे प्रबोधमथवा प्रोक्तान्मंत्रान्पठेत् ब्रह्मेंद्ररुद्राग्निकुबेरसूर्य्यसोमादिभिर्वंदितवंदना
य बुध्यस्व देवेश जगन्निवासमंत्रप्रभावेन सुखेन देव इयं तु द्वादशी देव प्रबोधाय विनिर्मिता त्वयैव सर्वलोका।
नां हितार्थं शेषशायिना त्वयि सुप्ते जगन्नाथ जगत्सुप्तं भवेदिदं उत्थिते चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ माधव इदं विष्णु
रनेनाभ्रतल्पाद्गुत्थापयेत्प्रभुं प्राजापत्यं च गायत्र्यं वैष्णवं सर्वकामदं उत्तिष्ठोत्तिष्ठ गोविंद योगनिद्रां विहाय च
अनेन मंत्रेणोत्थाय घंटावादित्रनिःस्वनैः तीरं समुपवेश्येशं महान्तं यदमर्चयेत् सोमाभ्यदभ्रकरुणो भगवा

स्वहस्तैः प्रेमस्मितेनननयनांबुरुहं हविर्जंभजेत् उत्थायविश्वविजयाय वनाविषादं मध्याग्निरापतयतात्स्वकृषः प्रणाणः इ
तिपुष्पांजलिंदत्वासक्तमाथर्वणं जपेत् स्नापयेद्गायत्र्यंपंचामृतैः पुरुषसूक्तेननीराजयं मंत्रविन्यस्य वस्त्रालंकार
चंदनैः स्रग्धूपदीपदिव्यान्नतांबूलैस्तोषयेद्विभुं एवंकृत्वामहापूजांगृहीत्वासाक्षतंजलं प्रतिमासव्रतान्कृत्वारा
घवायतिवेदयेत् अधिष्ठितेमयानानाचातुर्मास्यव्रतैः प्रभुः प्रभूतयानकस्तांतेराघवः प्रीयतांमम एवंव्रतान्यर्पी
यित्वास्तुवीतपरमाद्भुतः कृतिस्तुत्यावेदस्वंदिवोधमानंरमापतिं जयजयेत्यादिवेदस्तुतिः स्वस्त्यस्तुविश्वस्यखलः
प्रसीदतांध्यायंतुभूतानिशिवंमिथोधिया मनश्चभद्रंभजतामथोक्षजेत्स्त्वावेशपतनोनोमितिरप्यहैतुकी इत्याशिवःस
मभ्यर्थ्यगीतवाद्यजयः स्वनैः पूजांचाखिलयापेभ्योसक्तायांतिहरेः प्रदद्युक्तमेत्यादिवाहेमरकतरणाकिंकिणी
जालमाला रत्नाढ्यैर्मौक्तिकानामविरतमणिभिः संभृतैस्त्रैवहारैः हैमैः कुंभैः पातुकाशिवतातफविभिः भूषितैः के
तुमद्भिः छत्रैर्बलशवंयोदुरितहरहरैः पातुजेत्रोरथोवः पलायधपलायध्वंरेरेदितिजदानवाः सरत्नणायलोकानां
रथारूढोत्रकेशवः इत्यादिविस्मयमौक्तमंत्रैः संतोष्यसादरं प्रसादमालांतत्रहरेर्गृहीयाद्भक्तिभावितः जयदेव
महादेवजयरामाविलेम्बरात् वरदेशाविलंवरतरत्नजगत्पते जयसीतापतेदेवजयदैत्यनिषूदन देवदेवाखि
लाधारयाहिनः शरणागतान् नत्वैपर्वादिर्यमंगवतिप्रेमवादजयस्वनैः भ्रामयेत्संपदनंविशाः परमध्येसमंततः

चं.
६७
67

रथस्याकर्षणं कुर्वंतो दैत्यनायकाः सुराश्च सिद्धसंघाश्च मुनिगंधर्वमानवाः यावत्पदानि कृष्णस्य रथस्याकर्षणे नरः
करोति क्रतुभिस्तानि तुल्यानि तत्र नायक: रथेन सह गच्छंति पृष्ठतोग्रतः महाविष्णुसमास्तेन भवंत्यत्र भवाश्च
पि श्रीकृष्णरथयोग भो ये प्रकुर्वंति वदंति च जयेति च पुनर्यैवै तेषां लोकाः सनातनाः रथस्थितेन देवेन विप्र पूजितोम
धुसूदनः ददाति वांछितं तेषामंते च परमां गतिं दोलायमानं गोविंदं रथस्थं मधुसूदनं तृणं भक्त्या सकृद्दृष्ट्वा
पुनर्जन्म न विद्यते रथेन भ्रममाणं ये न गच्छंति जनार्दनं विप्रा वेदविदस्तेपि विज्ञेयाः श्वपचाधमाः येषां गृहागतो
याति रथस्थः श्रीनृकेसरी पूजितो नैस्तैः प्रकर्त्तव्या वित्तशाठ्यविवर्जितैः अनर्चितो यदा याति प्रमादात्स्वगृहाद्बहिः
पितरस्तस्य विप्रेंद्र यावत्संवत्सरं नृप स्त्रियोपि भक्तिमायांति रथयात्रापरायणाः नीराजनेन गीतेन वाद्येन मंडले
श्वराः रथोत्सवं समादृत्य कलौ वित्तं त्यजेद्धियः सशैलवनदेशाढ्येन दत्तावसुंधरा इति पद्मपुराणोक्तेर्भ्रमयित्वा
रथं गृहं गत्वा नीराज्य देवं प्रांशयीत राघवं स्मरन् इति रथमहोत्सवः पौर्णमास्यां तु संध्यायां कर्त्तव्यस्त्रिपुरोत्सवः
दृष्ट्वा प्रदीपं नो विप्र जन्मिनः श्वपचा अपि इति स्कांदे त्रिपुरोत्सवः इति कार्त्तिककृत्यं मार्गशीर्षे एकभक्तं कृत्वा योभ्य
र्चयेद्धरिं भोजयित्वा द्विजान्भक्तः स्यादित्याह कलिप्रियः नक्तव्रतेन यो मासं मार्गशीर्षे हरिप्रियं नयेद्देवो नरो या
ति विष्णुलोकं सनातनं इति विष्णुधर्मे मार्गशीर्षकृत्यं पौषस्यैकादशीं [illegible]क्तो मासमभ्यस्य स्थंडिलेशयः मासमात्रं व्र ६७

श्रु =

प्रीतये हि वारं स्नानमाचरेत् त्रिकालमर्चयेद्रामं नक्तभोगी जितेन्द्रियः माघस्य द्वादशी शुक्ला यावत्संपूर्णफलप्रदा मासम
ईजवर्द्धवादशग्रहं वा तदर्द्धकं कृत्वा याति हरेः स्थानं पूजां वदमतोत्सव विसृज्य निवेदितान्नेन यजेद्देवं दैवतान्तरं पितृ
भ्यश्चैव तद्देयं तदानन्त्याय कल्प्यते पितृप्रीणनं तयोर्दद्याद्धारयेत्परमात्मने रेतेनादाः पितरस्तस्य भवन्ति लोकशोभा।
गिनः गीतैर्वाद्यैश्च नृत्यैश्च दधिभक्तं समर्पयेत् अर्चयित्वा हरेर्भक्त्या प्रसादादनयेन्नरः यः प्रसादं हरेर्भक्त्या गृ
ह्णाति प्रददाति च भुनक्ति वैष्णवैः सार्द्धं मोदते तत्फलमश्नुते इति विष्णुधर्मे माघपूर्णायां दध्योदनोत्सवः तपस्यपौ
र्णमास्यां तु कुर्यादिह हौलिकोत्सवं वसन्तोत्सवं प्रकुर्वीत परमानन्दरूपिणे प्रभाते विमले जाते प्रतिपद्यास्फोटाद
ये कृत्वा चावश्यकं कर्म संतर्प्य पितृदेवताः वन्दयेद्धौलिभूतिं च सर्वदुष्टोपशान्तये वन्दितासि सुरेन्द्रेण ब्रह्मणा
शंकरेण च अतस्त्वं पाहि नो भूते भूतेभ्यो भूतिप्रदा भव प्रातर्वसन्तसमये रमणीरमाया अभ्यर्च्य चन्दनरमालमृदुप्रवा
लैः प्रार्थ्यानि चूतकुसुमानि निवेद्य देवे संतोषहृद्विविधगीतविनोदनृत्यैः मण्डिते च चिते शुभे उपलिप्ते गृहाजिरे चतुष्कं
कारयेद्रम्यं वर्णकैश्चापि तत्र तैः शुभैः तन्मध्ये स्थापयेत्पीठं श्लक्ष्णवस्त्रोत्तरच्छदं अथ तत्र पूर्णकलशं स्थापयेत्पल्लवैर्युतं
आसने चोपविष्टस्य ब्राह्मणैर्घोषेण भारत अभिषेकं प्रकर्तव्यः सह देवैश्चूतपल्लवैः कुसुमैः स्नेहतत्तत्स्मवसन्तनवपल्लवैः सं
शयामि सुखदमायुरारोग्यवर्द्धनं येऽपि बन्ति वसन्तादौ हूतपुष्पं सचन्दनं सम्यक् हृदिस्य का [illegible] जते कुर्वते जनाः
अनन्तरं द्विजेन्द्राणां सूतमागधवन्दिनां दद्याद्दानं यथाशक्त्या कामात्मा प्रीयतामिति ततो भोजनवेलायां स्कन्दपा

चं॰ गोवत्सद्विने प्राशयेत्प्रथमंचान्नंततोभुंजीतकामतः सायंचूतककाम्येनतत्कंदर्पीदग्धांविशून् नूतनकुंभांभसाचूतपल्ल्वा
वैरभिषेचयेत् एवंयःकुरुतेपार्थश्रणोक्तफाल्गुनोत्सवं मत्प्रसादाचुसिध्यंतितस्यसर्वेमनोरथाः हुतेनुषारसमये
६८ सितपंचदश्यांप्राप्तवसंतसमयेसमुपस्थितेच संप्राश्यचूतकुसुमंसहचंदनेनसत्यंहिपार्थपुरुषोऽथशतंसुखीस्यात्
इतिभविष्योत्तरेश्रीभगवद्गुक्तोवसंतोत्सवः इतिफाल्गुनकृत्यं अधिमासेतुसंप्राप्तेस्नात्वासीतापतिंहरिं सुवर्णं
चाज्यसंयुक्तंत्रयस्त्रिंशदपूपकं दद्याच्चवेदविदुषेब्राह्मणायाकुटुंबिने नश्यंत्यकरणोत्पीडिंपुण्यंद्वादशमासजं
68 इतिभविष्योत्तरेअधिकमासकृत्यं द्वादशस्वपिमासेषुपक्षयोरुभयोरपि विधातव्यःप्रकर्त्तव्यएकादश्यांचजागरः
दशम्यांप्रातरुत्थायकृतमैत्रादिकोब्रवीत् देवार्चनक्रियांकृत्वाकुर्यात्संकल्पमादतः दशमीदिनमारभ्यकरिष्ये
हंव्रतंतव त्रिदिनंदेवदेवेशनिर्विघ्नंकुरुकेशव इत्युच्चार्यार्पयेत्पुष्पांजलिंश्रीरामपादयोः शंखोदकेनसंकल्पप्रणामे
दंडवद्धरेः इतिदशमीसंकल्पः एकादश्यांतुपूर्वाह्णेनिर्वर्त्यदंतधावनं स्नात्वादेवार्चनंकृत्वाव्रतसंकल्पमाचरेत् एका
दश्यांनिराहारस्थित्वाहमपरेहनि भोक्ष्यामिपुंडरीकाक्षशरणंमेभवाच्युत इतिचांजलिपात्रेणार्पयेद्देवलवाक्यतः
गृहीत्वौदुंबरंपात्रंवारिपूर्णमुदङ्मुखः उपवासंगृहीत्वाथमंत्रपूतंजलंपिबेत् इत्येकादशीसंकल्पः कृत्वान्नावपूपकं
सर्वंद्वादश्यांव्रतमर्पयेत् अज्ञानतिमिरांधस्यव्रतेनानेनकेशव प्रसीदसुमुखोनाथज्ञानदृष्टिप्रदोभव इतिद्वादशी
संकल्पःभविष्योक्तप्रकारेणकुर्याद्धित्रिदिनंव्रतं प्रसिद्धत्वान्नदस्माभिःकर्त्तव्यंतन्नप्रपंचितं कृष्णजन्माष्टमीमाख्यायर्म

तोनाराम्मोदिता नत्नकाम्नात्नविज्ञेयावैश्मवीवैश्मवेनैवैः प्रसिद्धत्वान्नचोच्यंते ग्रंथविस्तरभीतितः प्रसिद्धस्यत्तसंकोचेप्र
सिद्धस्यविस्तरः चैत्रादिद्वादिनोत्स्वाभिः कर्त्तव्यस्यशान्तद्दष्टये ब्रह्मातंदेनिमग्नस्यतालेमेस्यान्तिस्थिरंमनः तत्पादपद्मंग
येनयथास्याज्ज्ञानकीपते नकोनतायेनतनोस्तिमेयतः प्रकाशितातेचंनचंद्रिकेयं तद्देहभवत्वसहत्तेनयस्मात्न
स्मात्नदन्यंतदिहरामचंद्र रामोस्मीत्यतियत्नधीरनिरंतं रामंभजेत्नहृद्येयद्रामेणनियुक्तमेतदखिलंरामायतन्चार्पये
रामादेतदभिन्नमेवचरितंकोवेत्तिरामस्यतद्रामेसर्वमिदंविलीयतइतोमेरामसाम्यंततः कार्त्तिकेशपदशार्कयोरक्ष
यतेस्मत्सादेवमैथिलीदात्तनंचविभीषणेनवद्धविधेयस्तेहृप्रतः सांप्रतं संसारदावानलतायशांन्त्यैश्रीरामचंद्रार्चन
चंद्रिकेयं स्यात्संहितामार्गमुपाश्रयद्भिर्भवादिभिर्निर्मितमोक्षयंत्या पटलैः पंचभिः प्रोक्तश्रीरामार्चनचंद्रिका आ
नंदवननाम्नाहिकविनाहरितुष्टये ॥ इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्मुकुंदवनश्रीचरणशिष्यानंदव
नविरचितायांश्रीरामार्चनचंद्रिकायांपंचमः पटलः संपूर्णः समाप्ताचेयंरामार्चनचंद्रिका ॥ संवत् १९ २५ ॥

69

